JYOTIṢA PHALARATNAMĀLĀ

OF

KṚṢṆA MIŚRA

Edited by

Sri A. A. RAMANATHAN, M. A., L. T.,

and

Sri T. H. VISWANATHAN,

The present work which has been taken for publication for the first time, is a minor treatise, dealing with predictions relating to the duration and certain other important incidents of human life, supposed to be caused to a person by the influence of certain planets, when they happen to occupy certain positions at the time of his birth. The predictions made herein are based on Jaiminisutras. The work is written in a variety of metres and consists of 28 adhyāyas though it is mentioned in the beginning of the work as having 30 adhyāyas. Some portions are in prose also. Various daśas and lagnas are prescribed here in order to find out the good or bad result as accurately as possible and this seems to be the main aim of this author. In his conclution the author says that he has dealt with the subject very briefly and that further details can be known from the commentary on Jaiminisūtras called Jyothiṣa kalpalatā of his son, Somanātha Miśra.

The author of this work is one Kṛṣṇa miśra. He is the son of Paramānanda and the grandson of Rāmadīkṣita of Kutsagotra. He was well-versed in Nyāyavaiśeṣika, Vyākaraṇa, Sāhitya and Saṅgīta. He mentions his other work Kṛṣṇīyam, a work in divination here Vide 5th stanza of VI Adhyāya. He has composed two other works with the names Kālasarvasva and Alaṅkārasudhākara, a commentary on Sāhityaratnākara. It is understood from the colophons of these works that he was having the title Mahāmahopādhyāya.

The author mentions a work Daivajñacūḍāmaṇi and frequently refers to one Sarvajñaguru. The time of this author is not known. It appears that this author and his ancestors lived in Oriya district. It is also possible that the mother tongue of this author may be Tamil, since he uses the word Buddhisālī instead

of Buddhimān in the sense of a clever person. Vide 20th stanza of XI Adhyaya. He also mentions one Vānchināthan who is supposed to be the author of the work Vāncināthiyam or Bhāvadarpaṇam. The author salutes one Siddheśa along with Rāma who may apparently be his grandfather. This author is different from the well-known Kṛṣṇamiśra author of the philosophical drama Prabodhacandrodaya, different also from Kṛṣṇamiśra the author of the commentary Kalpalatāvatāra on Bhāskarācarya's Bījagaṇita.

This publication is based on the following manusripts.

1.	D. 13828	palm leaf - Grantha - Complete	This is Termed as		क
2.	R. 12343	palm leaf - Grantha - Incomplete	,,		ख
3.	D. 13830	palm leaf - Telugu - Complete	,,		ग
4.	D. 13829	Paper - Telugu - Incomplete	,,		घ
5.	R. 15665	palm leaf - Grantha - Incomplete	,,		ङ
6.	R. 12315	palm leaf - Grantha - Complete	,,		च

॥ श्रीः ॥

॥ ज्योतिषफलरत्नमाला ॥

कृष्णमिश्रविरचिता

[1]श्रीविक्रमार्को जगतीतलेऽस्मिन् जीयान् मनुप्रख्ययशा नरेन्द्रः ।
पुपोष यः कोटिसुवर्णतो मां सबान्धवं सप्तति वत्सराणि ॥

तत्राध्यायास्त्रिंशद् ग्रन्थमितिसंख्यया पुनर्द्विसाहस्रम् ।
नानावृत्तविचित्रं कुर्मः श्रीविक्रमार्कनृपकीर्त्यै ॥

करबदरसमानं शास्त्रमेतद्विपश्चिन्
नियतमपि विलोच्य श्रेयसे यन्नराणाम् ।
यदि वदति तदानीं देवतुल्यो मनुष्यः
परमशिवपदं च प्राप्नुयादन्त्यकाले ॥

[2]मुनिवरकृतहोराकाननेषु स्वबुद्ध्या-
प्यनधिगतफलत्वात्प्राप्त(प्य)सौख्यं मनुष्यम् ।
स्फुटतरफलरत्नैर्भूषयन् कर्णदेशे
जयति जगति विद्याभूषणः कृष्णमिश्रः ॥ १ ॥

मेषाद्याः प्रथिताः क्रमेण मुनिभिः प्रोक्तास्तथा राशयः
खेटाश्चात्र तु कथ्यतेंऽशकविधिः संक्षेपतः कारकाः ।
पूर्वस्मिन् चरभाद्भवेद् ग्रहपराधीशक्रमेण द्विधा
भागाः स्युस्स्थिरभे तथोभयगृहे पूर्वैर्मुनीन्द्रैर्मतम् ॥ २ ॥

अथ प्रकारान्तरेण भागानयनम्

चरभे चरभात्स्थिरभे नवमात्
सुतभादुभये मुनयोऽपि जगुः ।
विषमात्क्रमतो विपरीतमथो
विदुरंशककल्पनमत्र बुधाः ॥ ३ ॥

---

1. च. श्लोकत्रयमत्रैवोपलभ्यते 2. ग. अयं श्लोको नोपलभ्यते

दृगाणकूलसिश्चरभाचराणां
गृहाधिपे युग्मगते स्थिराद्धि ।
व्ययं समारभ्य तथोभयस्थिते
तदादि सन्तः प्रवदन्ति नित्यम् ॥ ४ ॥

राशीश्वरः स्यात् प्रथमो द्वितीयो
भागाधिपो लग्नपतिस्तृतीयः ।
चन्द्रश्चतुर्थो ग्रहनायको वे-
त्येवं हि योगे फलकारकाः स्युः ॥ ५ ॥

स्वलग्नपादष्टमगस्तदाद्यः
फणीनपुत्रौ हि तथा द्वितीयौ ।
चन्द्रो धराजस्तदनु(त)स्तृतीयौ
निर्याणकाले फलकारकाः स्युः ॥ ६ ॥

दशाविधौ तत्तदधीश्वराः स्युः
फलप्रदा मेषचतुष्टयस्य ।
तथा स्थिराणां रिपुगेहनाथाः
केन्द्राधिपाश्चोभयमन्दिरस्य[1] ॥ ७ ॥

तथोडुदाये मुनिभिः प्रणीता
ये कारकास्ते युजि तत्क्रमेण ।
अन्यत्र तु स्याद्विपरीतमेव
नक्षत्रनाथे विषमान्यसंस्थे ॥ ८ ॥

[2]पदं विलग्नाधिपतेर्वदन्ति
प्रधानमन्ये तु विलग्नराशेः ।
बलाबलं दैवविदृश्य पश्चात्
पदं विनिर्दिश्य[3] वदेद्यथार्थम् ॥ ९ ॥

---

1. च. रे स्युः
2. क. ख. पूर्वोत्तरार्धे विपर्यस्ते ।
3. घ. विनिश्चित्य

पदप्रवृत्तिर्न च राहुतः स्यात्
बलाधिकाच्चापि न केतुतश्च ।
धरासुतश्चार्कसुतोऽप्यधीशौ
दशाविपाके बलवानधीशः ॥ १० ॥

खेटे तथा स्वर्क्षगते चतुर्थं
पदं भवेत् सप्तमगे च रिःफम् ।
अन्यत्र च स्वर्क्षगते तदेव
पदं विलग्नाधिपतेर्वदन्ति ॥ ११ ॥

चन्द्रो यदा कर्किणि संस्थितः स्यात्
राशीश्वरो लग्नपतिः [1]तदा स्यात् ।
तत्रैव जातस्य नरस्य केन्द्र-
त्रिकोणकेतौ (शौ) बलिनौ हि तेन[2] ॥ १२ ॥

उच्चाधिनेत्रापि युतस्तथोच्चः
नीचेन युक्तोऽपि तथैव नीचः ।
भावेशयुक्तोऽपि च राहुयुक्तो
बलव्यपेतस्सखगोऽत्र[3] शास्त्रे ॥ १३ ॥

बलाधिकाः स्वर्क्षगताः खगाः स्युः
तत्रापि चन्द्रेण युता बलिष्ठाः ।
नीचारियुक्ता विबलास्तथास्तं-
गताश्च सूक्ष्मस्थितिमाश्रिताश्च ॥ १४ ॥

मेषत्रिकोणे बलवान् रविः स्यात्
कीटे तथा मन्त्रिगृहे विशिष्य ।
बुधस्य गेहे तु कदाचिदाहु-
रन्यत्र राशौ स बलव्यपेतः ॥ १५ ॥

---

1. घ. तथैव.
2. च. बलवान् हि नेता नेता=कारकः
3. च. ग. खचरोऽत्र

चन्द्रो [1]भृगोः स्वर्क्षगतो [2]गुरोश्च
गृहे बली भार्गवमन्त्रियुक्तः ।
मध्योऽर्कपुत्रस्य गृहे बली स्यात्
भौमज्ञसूर्यर्क्षगतो युतश्च[3] ॥ १६ ॥

भौमो बली स्वर्क्षगतोऽपि[4] जीव-
[5]निशेशयुक्तश्च तदीयगेहे ।
मध्योऽर्कयुक्तो विबलोऽन्यथा स्यात्
इतीव सर्वज्ञमते वदन्ति ॥ १७ ॥

बुधस्तथा स्वर्क्षगतो दिनेश-
मुक्तो बली शोभनखेटयुक्तः ।
मध्यः कुजक्षीणसुधांशुयुक्तः
परत्र दौर्बल्यमुशन्ति सन्तः ॥ १८ ॥

गुरुः शुभः क्षीणसुधांशुशुक्र-
भुजङ्गमानां युतिमन्तरेण ।
मध्यस्तथा भौमतदीयगेहे
परत्र दौबर्ल्यमुशन्ति सन्तः ॥ १९ ॥

शुक्रो बलीयान् खचराधिनेतृ-
कन्यायुतिं चास्तमनं विनैव ।
क्रूरेण युक्तोऽपि बुधेन मध्यः
फणीन्द्रयुक्तो मरणे बलीयान् ॥ २० ॥

शुक्रर्क्षगः स्वर्क्षगतो बलीयान्
शनिस्सुराचार्यगृहे बुधस्य ।

---

1. च. गुरु—ग. गुरोः
2. च. भृगोश्च
3. घ. स्यात्
4. ङ. ज्ञजीव
5. घ. शशिज्ञ

गृहे च मध्यो विबलोऽन्यथा स्यात्
योगे ग्रहाणामपि तद्वदेव ॥ २१ ॥

राहुस्सदा क्रूरयुतो बलीयान्
शुक्रेण युक्तोऽपि तथैव मध्यः ।
सदापि राहुर्मरणे बलीयान्
बलस्य हानिः न कदापि तस्य ॥ २२ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां प्रथमोऽध्यायः ॥

ओजे विलग्ने तु तदेव लग्नं
युग्मे तु तत्सन्मुखमामनन्ति ।
तत्रापि [1]तत्सप्तमयोर्बलानि
निर्णीय विद्वान् प्रवदेत् फलानि ॥ १ ॥

एवं गृहीतादपि लग्नभावात्
पदं समानीय सदा विपश्चित् ।
ऐश्वर्यमायुश्च विभज्य काले
वदेदयत्नेन दृढं सभासु ॥ २ ॥

पदे शुभानामपि संयुतिं च
केन्द्रे शुभानामपि संयुतत्वम् ।
व्ययत्रिकोणेषु च राहुयोगं
विना स्थितार्थं[2] शुभयोगमाहुः ॥ ३ ॥

पदं समानीय विचक्षणेन
प्रदक्षिणेनैव विचारणीयः ।
भावा नयुग्मे च तदन्यथा स्युः
पदक्रमोऽयं विबुधैः प्रणीतः ॥ ४ ॥

---

1. च. म्मुखयोर्बलानि 2. च. तः स्यात् शुभ-

पदे तथा क्रूरगृहे शुभेन
ग्रहेण दृष्टेऽप्यशुभाय भावि ।
शुभे तथा शोभनखेचरेण
दृष्टे शुभत्वं समुदाहरन्ति ॥ ५ ॥

[1]पदाश्रये शोभनखेचराणां
योगे भवेद्राजसमानयोगः ।
अन्यत्र शुक्रादपि रात्रिनाथा-
न्नीचादपि स्यात् विपरीतमेव ॥ ६ ॥

लाभे पदाच्चन्द्रगुरू भुजङ्ग-
युक्तौ तदाहुः निधिलाभमार्याः ।
एको भृगुश्चन्द्रयुतो यदि स्यात्
भवेन्नरेशाद्धनलाभ एव ॥ ७ ॥

लाभे बुधार्की[2] भुजगेन दृष्टौ
देवालयक्षीणगृहेषु तद्वत् ।
भौमेन भूमाववटेषु केतोः
चन्द्राज्जलेष्वित्यवदन् मुनीन्द्राः ॥ ८ ॥

रवौ तथा भौमगृहे पदस्य
लाभे स्थिते भ्रातृधनस्य लाभः ।
जीवस्य गेहे तु सुताद्धनाप्तिः
बुधस्य तु ज्ञातिधनं वदन्ति ॥ ९ ॥

चन्द्रार्किगेहे स्वभुजार्जितं स्यात्
अन्यत्र राज्ञो धनलाभ एव ।
क्रूरैर्युते नीचगतेऽप्यमार्गात्
शुभैर्युते स्वोच्चगते सुमार्गात् ॥ १० ॥

---

1. घ. ख. पदाद्वयये । 2. च. कौ

[1]चन्द्रो बलीयेन (लिष्ठेन) युतोऽपि यस्य
गेहे स एव प्रभवेत् फलाय ।
[2]दिनेशयुक्तोऽप्यथवापि नीचो
धनव्ययायैव भवेन्नितान्तम् ॥ ११ ॥

भौमो बली लाभगतस्तथैव
क्रूरैर्युतो स्वल्पधनप्रदाता ।
क्षेत्रक्रमात् भ्रातृसुतादिकायात्
वदन्ति लाभं यवनाः स्वगेहे ॥ १२ ॥

शुक्रस्य राज्ञः सचिवस्य पुत्रात्
रवेः पितुश्चन्द्रमसः कलत्रात् ।
बुधस्य तु ज्ञातिधनं फणीन्द्रात्
चौर्येण केतोः मुनयो वदन्ति ॥ १३ ॥

चन्द्रार्कजौ राहुगुरू कुजार्की
ध्वजार्कपुत्रौ यदि चोक्तरीत्या ।
स्थिताः तदानीं नियतं नराणां
लाभे पदान्नीचधनप्रदाः स्युः ॥ १४ ॥

नीचस्थिताः शोभनखेचरेन्द्राः
युक्ताः तदा म्लेच्छधनप्रदाः स्युः ।
राहुः शुभक्षेत्रगतस्तथैकः
केतुस्तथा क्रूरगतस्तथैव ॥ १५ ॥

नीचोच्चगैश्चन्द्रसुतस्तथैव
क्रूरैर्युतो म्लेच्छधनप्रदाता ।
गुरुर्यदा नीचगतः तदंशे
द्रेक्काणगो म्लेच्छधनप्रदाता ॥ १६ ॥

---

1. च. न्द्रेण नीचेन 2. च. नीचेश

भौमो भुजङ्गेन दिनेश्वरेण
नीचेन चण्डालधनप्रदाता ।
बुधोऽपि शीतांशुवदेव येन
युतो भवेत्तद्वदिति प्रसिद्धिः ॥ १७ ॥

स्वक्षेत्रगो जीवयुतस्तथैको
विद्याविवादेन धनं ददाति ।
पदस्य लाभे यदि भौमगेहे
गुरुर्यदि द्रव्यकरो नराणाम् ॥ १८ ॥

शुक्रस्य गेहे तु वधूधनाप्तिः
बुधस्य गेहे निजविद्ययैव ।
राज्ञो धनं चन्द्रदिनेशगेहे
सेवाधनं सूर्यसुतस्य गेहे ॥ १९ ॥

वाणिज्यतो भौमगृहे स्वगेहे
भृगुर्बुधर्क्षे कृषितो वदन्ति ।
निक्षेपतः[1] सौरिगृहे रवीन्दु-
गेहे नृपाल्लाभमुदीरयन्ति ॥ २० ॥

भौमर्क्षसंस्थोऽर्कसुतः कुवृत्त्या
शुक्रर्क्षसंस्थो धनदो नृपस्य ।
ज्ञगेहगो देवधनप्रदाता
चन्द्रार्कगेहे कृषिलाभदाता ॥ २१ ॥

गुरोर्गृहे ब्रह्मधनापहर्ता
स्वक्षेत्रगे सेवकदायहारी ।
ध्वजस्य गेहे तु गुरुस्वहारी
म्लेच्छस्वजीवी फणिराजगेहे ॥ २२ ॥

---

1. च. चारि

एको बली कुण्डलिनां वरेण्यः
राज्यार्धमेव प्रदिशत्यजस्रम् ।
शुक्रेण युक्तश्च दिनेशयुक्तः
तथैव नो चेद्विपरीतमेव ॥ २३ ॥

न्याय्यं धनं क्रूरगृहे भुजङ्गे
विपर्ययं सौम्यगृहे [1]ददाति ।
एवं ध्वजस्यापि विचार्य विद्वान्
फलं वदेन्नो वितथं कदापि ॥ २४ ॥

केन्द्रस्थिताः सौम्यखगाः शुभाय
क्रूरा ग्रहा दुष्टफलप्रदाः स्युः ।
द्रष्टा व्ययस्य प्रबलोऽपि खेटः
पदाद्विरोधीति वदन्ति सन्तः ॥ २५ ॥

केन्द्रस्थितो वा निधनस्थितो वा
पदाद्बली पश्यति यो व्ययं च ।
विशिष्य शुक्रेन्दुभुजङ्गराज-
दृष्टे व्यये निर्धनतैव सत्यम् ॥ २६ ॥

तृतीयषष्ठर्क्षगताश्च नीचाः
क्रूराः पदार्थकरा भवन्ति ।
उच्चास्तु पश्यन्ति यदि प्रकृत्या
पदं तदा तान् सबलान् वदन्ति ॥ २७ ॥

विलग्नभात् कारकतः पदाच्च
विचार्य खेटान् विविधान् विपश्चित् ।
उदीरयेत् राजसभासु सम्यक्
कदापि नो याति मृषापदं सः ॥ २८ ॥

॥ इति श्रीबालात्रिपुरसुन्दरी कृपाकटाक्षसमधिगतसमस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां द्वितीयोऽध्यायः ॥

---

1. ब. वदन्ति

चरा स्थिरान् पञ्चमलाभभावान्
स्थिरास्त्रिषष्ठं नवमं तथैव ।
चतुर्थजामित्रगृहं च रिःफं
तथोभयस्थाः प्रविलोकयन्ति ॥ १ ॥

[1]ओजे विलग्ने तु तदेव लग्नं
युग्मे तदन्यत् पुरुषस्य योज्यम् ।
तत्रापि तत्सप्तमयोर्बलेन
ग्राह्यं विलग्नं नियतं हि सद्भिः ॥ २ ॥

शनिः कुजो ज्ञो गुरुशुक्रचन्द्र- (शन्यारसौम्येज्यसितैणचिह्न)
दिनेश्वराणां बलमुत्तरं स्यात् ।
अन्ये तु सूर्येन्दुभृगोस्तनूज-
गुरुज्ञभौमार्कसुतान् वदन्ति ॥ ३ ॥

ग्रहव्यपेतात् सखगो बलीयान्
तत्राप्यनेकग्रहसंयुतत्वम् ।
साम्ये चरादिक्रमतो बली स्यात्[2]
तत्रापि साम्ये तु निसर्गतः स्यात् ॥ ४ ॥

एवं चतुर्धापि बलं च योज्यं
योगे विलग्नस्य सदैव सद्भिः ।
मृतौ तु सर्वत्र तु दुर्बलं हि
बलाधिकं ग्राह्यतमं वदन्ति ॥ ५ ॥

यथोत्तरं योगविधौ ज्ञकेतु-
भृगोस्तनूजाङ्गिरसां वदन्ति ।
अन्ये विदो देवपुरोहितस्य
ध्वजस्य शुक्रस्य बलं फणन्ति ॥ ६ ॥

---

1. ङ. नास्त्ययं श्लोकः 2. घ. यान्

रव्यारमन्दा भुजगश्च मृत्यौ
[1]बलेन युक्ता हि यथोत्तरं ते ।
क्षीणश्शशी क्रूरयुतो बुधश्चे-
त्येवं जगुः केचन [2]मौनिवर्याः ॥ ७ ॥

शुभैर्युतः पूर्णकलः तथोच्चः
चन्द्रः खगेभ्योऽभ्यधिकं बलीयान् ।
श्रेयोऽशुभस्यापि विधौ बलीयान्
[3]सदापि नीचो विबलोऽपि चन्द्रः ॥ ८ ॥

विचक्षणो लग्नबलं विचार्य
शुभानि पश्चान्नियतं विलोक्य ।
संवादतो द्वित्रिशुभैर्दशासु
ब्रूयान्नृपाणां सततं फलानि[4] ॥ ९ ॥

विलग्नगो लग्नपतिः परत्र
द्वौ खेचरौ तत्र बलं विलग्नम् ।
एकस्तथा स्वोच्चगतः परत्र
द्वौ वा तदानीमपि तद्वदेव ॥ १० ॥

एकत्र तु द्वावधिपौ तु नीचः
तत्सप्तमेऽप्येकखगे तथैव ।
ग्रहैर्वियुक्तोऽप्यधिपे तथोच्चे
तदेव लग्नं प्रवदन्ति [5]सन्तः ॥ ११ ॥

---

1. ग. यथोत्तरं ते हि बलेन युक्ताः
2. ङ. योगि
3. च. पापो
4. ङ. सभासु
5. घ. धीराः

एवं च राशेरथ राशिपाच्च
बलानि सर्वं च निरीक्ष्य विद्वान् ।
दशाविपाकेष्वपि तद्वदेव
बलाधिकं लग्नपदेऽभिषिञ्चेत् ॥ १२ ॥

सर्वत्र साम्येऽपि दृगाणतोऽपि
विचारणीयं हि बलं सुधीभिः ।
तत्रापि साम्ये खलु होरतः (या) स्या-
दितीव सर्वज्ञमते वदन्ति ॥ १३ ॥

त्रिंशत्कला व्योममणेर्विधोस्तु
कलास्तथा षोडश भूसुतस्य ।
षड् ज्ञस्य चाष्टौ सुरपूजितस्य
भृगोर्दश द्वादश चैकिकार्केः ॥ १४ ॥

निदानमेतद्धि बले निसर्गे
कलाविभागान् मुनयो वदन्ति ।
बली फणीन्द्रो ध्वजतस्तथैकः
शुभैर्युतत्वे बलवान् ध्वजः स्यात् ॥ १५ ॥

राहुर्बली क्रूरखगेन युक्तो-
ऽप्येतद्बलं जातकमात्र एव ।
नीचस्तथा स्वोच्चखगेन युक्तः
स्वयं तथोच्चस्य फलं ददाति ॥ १६ ॥

योगे तदन्यत्र तु नीच एव
बली युतोच्चं विबलं करोति ।
दशाविभागेऽप्ययमेव योज्यः
न्यायस्तथा शास्त्रविशेषतश्च ॥ १७ ॥

[1]विचारणीयं बहुशोऽत्र सद्भिः
ग्रन्थस्य विस्तारभयान्न चोक्तम् ।

---

1. ङ. नास्त्ययं श्लोकः

अतः स्वबुद्ध्यैव विचार्य सर्वं
वदन्तु सर्वं गुणदोषविज्ञाः ॥ १८ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्तविद्या वैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां तृतीयोऽध्यायः ॥

योगेषु चन्द्रस्थितराशिनाथः
योगप्रदो जातकिनो नरस्य ।
विनैव वक्तुं यतते मनुष्यः
फलानि लोके स भवेन्मृषैव ॥ १ ॥

दिष्ट्या स पश्येदथ पूर्वशास्त्र-
निर्णीतलग्नं यदि यस्य कस्य ।
कुलाधमो वापि स एव लोके
नरेन्द्रपूज्यः स भवेत् चिराय ॥ २ ॥

स एव सूर्यो यदि मर्त्यनाथः
चन्द्रः तु भूपालसखः स एव ।
भृगुस्त्वमात्यः सचिवः तथैव
नेता बलानां क्षितिजो नरः स्यात् ॥ ३ ॥

बुधः कुमारो नृपतेस्तथैव
प्रेष्यो भवेत्सूर्यसुतो मनुष्यः ।
स एव सूर्यादिखगैर्युतश्चेत्
ददाति तत्तद्गुणमेव भूयः ॥ ४ ॥

बहुग्रहैश्चेद्बलवद्ग्रहस्य
गुणानुरूप्यं प्रददाति खेटः ।
दृष्टः फणीन्द्रेण युतोऽपि दुष्टं
[1]नृशंसवृत्तिं पुरुषं करोति ॥ ५ ॥

---

1. च. प्रशस्तविर्यं

ध्वजेन युक्तो यदि धर्मशीलं
कुरूपिणं चापि करोति मर्त्यम् ।
उच्चे तथा द्रष्टरि भाग्यजीवी
बहुक्षितीन्द्रैः बहुमानमेति ॥ ६ ॥

द्रष्टा तथैको बलवान् यदि स्यात्
तथा स भूपैः बहुमानजीवी[1] ।
क्रूरैर्युते द्रष्टरि दुष्टचित्तः
क्रूरे स्वयं क्रूरतरप्रवृत्तिः ॥ ७ ॥

उष्णस्वभावो दिननाथयुक्तः
स्वेदी सदा चन्द्रमसा युते स्यात् ।
कुजेन खर्ज्जूसहितो व्रणी वा
स्थौल्यं बुधे हस्तिसमानचर्मा ॥ ८ ॥

गुरौ शुभः पिङ्गलमूर्धकेशः
कामी भृगौ वक्रशिरोरुहश्च ।
शनौ कृशाङ्गः कुटिलस्सिरावान्
राहौ जराजर्जरिताङ्गसन्धिः[2] ॥ ९ ॥

ह्रस्वः कुरूपी च तथैव केतौ
वदन्ति सन्तः प्रकृतिं जनानाम् ।
एवं दशायामधिपाच्च योज्यं
[3]वदेन्मृषावान् न भवेत् सभासु ॥ १० ॥

॥ अथ योगफलम् ॥

रवीन्दुयोगे कुटिलो नृशंसः
रव्यारयोगे पितृदारगामी ।
रविज्ञयोगे श्रुतवान् गुणाढ्यः
जीवार्कयोः ब्रह्मविदुत्तमश्च ॥ ११ ॥

---

1. च. मेति
2. ग. यष्टिः
3. च. भूमौ मृषा नैव भवेन् मनुष्यः,

शुक्रार्कयोगे कुलटासुतः स्यात्
शन्यर्कयोः शूद्रसमो नरः स्यात् ।
फण्यर्कयोः म्लेच्छसमोऽतिदुष्टः
ध्वजार्कयोगे शिवपाददासः ॥ १२ ॥

चन्द्रारयोगे द्विजदारगामी
चन्द्रज्ञयोगे हरिभक्तियुक्तः ।
ब्रह्मज्ञशीलो गुरुचन्द्रयोगे
शुक्रेन्दुयोगे बहु [1]भोगवान् स्यात् ॥ १३ ॥

शनीन्दुयोगेऽप्यतिलोलचित्तः
फणीन्दुयोगे विधवातनूजः
ध्वजेन्दुयोगे सभयोऽतिदीनः
ध्वजी भवेद्धर्मपथे प्रवृत्तः ॥ १४ ॥

आरज्ञयोगे सुतदारलोलः
जीवारयोगे गुरुदारगामी[2] ।
शुक्रारयोगे नृपदारगामी ।
शन्यारयोः प्रेष्यवधूषु लोलः ॥ १५ ॥

राह्वारयोः म्लेच्छवधूविहारी
ध्वजारयोः देववधूषु सक्तः ।
जीवज्ञयोगे श्रुतवान् गुणज्ञः
कुलीनजन्मा बुधशुक्रयोगे ॥ १६ ॥

युतौ बहूनां बलवद्ग्रहस्य
गुणानुरूपेण विचिन्तनीयम् ।
नरः सदा जीवभुजङ्गयोगे
चण्डालकान्तारतिलोलुपः स्यात् ॥ १७ ॥

---

1. च. भाग्य 2. च. ग. गन्ता ।

अर्किज्ञयोगे कुटिलोऽतिमानी
फणिज्ञयोगे परदूषकः स्यात् ।
एवं युतौ योगदखेचरस्य
विचिन्तनीयं विबुधैः सदैव ॥ १८ ॥

द्रेक्काणपाल्लग्नपतेर्विलग्ना-
दप्येवमूह्यं विहितार्थरीत्या ।
वाञ्छन्ति लाभाधिपतेश्च केचित्
भाग्याधिपाच्चैवमुदाहरन्ति ॥ १९ ॥

योगे बली योगद एव खेटः
तथा भुजङ्गो मरणे बलीयान् ।
तदाश्रयाच्चान्यखगा भवेयुः
[1]लाभाधिपाच्चादिगुरोर्मतेन ॥ २० ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां चतुर्थोऽध्यायः ॥

॥ अथ भावाः ॥

लग्नं पश्येद्योगदो यः खगेन्द्रः
तस्योच्यन्ते ह्यर्गला योगसिद्ध्यै ।
यं न ज्ञात्वा मानवा ह्यासभूम्यै
संभूयन्ते भूभृतां सन्निधाने ॥ १ ॥

ओजस्थानां तत्क्रमेणैव गण्यं
युग्मस्थानां व्युत्क्रमेण प्रकल्प्यम् ।
राहोर्योगे योगदे व्युत्क्रमेणे-
त्येवं केचित् सज्ञगुर्मानवेन्द्राः[2] ॥ २ ॥

---

1. च. बलाधिकाच्चापि, ङ. भागादिकाच्चादि 2. ङ. मौनिवर्याः

वेश्मस्थाने [1]खेचराणां स्थितानां
कर्मस्थाने संस्थिता हानिदाः स्युः ।
वित्तस्यान्त्यं लाभगस्य तृतीयं
हानिस्थानं सर्वदा योगदस्य ॥ ३ ॥

दुष्टस्थाने संस्थितोऽप्यल्पखेटः
[2]कुर्यात्सत्यं संस्थितानां च हानिम् ।
[3]खेटाः कुर्युः योगदस्य त्रिकोणे
योगारम्भं यत्र कुत्रापि लोके ॥ ४ ॥

राहुः केतुः योगदस्य त्रिकोणे
कुर्यात् भङ्गं योगसिद्धेरवश्यम् ।
सौम्यैर्दृष्टः सौम्ययुक्तोऽथवाऽलं
नृणां लोके योगसिद्ध्यै[4] त्रिकोणे ॥ ५ ॥

लग्नाधीशो योगदः स्वर्क्षनाथः
पापोऽपि स्यात् योगसिद्ध्यै त्रिकोणे ।
नीचः खेटो नैच्यमेव प्रयच्छे-
दुच्चोऽप्येवं भूयसे मङ्गलाय ॥ ६ ॥

त्रिकोणसंस्थाश्च तथाष्टमस्थाः
पापा मुहुः भङ्गमुपाहरन्ति ।
क्षीणेन्दुदृष्टे व्ययभेऽपि तद्व-
द्वदन्ति सन्तो मुहुरेव भङ्गम् ॥ ७ ॥

दुष्टार्गलस्थाः सकलाश्च खेटाः
व्ययस्थिता वा[5] यदि योगदस्य ।

---

1. ग. संस्थितानां ग्रहाणां
2. च. हानिं कुर्यात् योगदस्य त्रिकोणे
3. च. सौम्यस्थाने संस्थिता भूयखेटाः
4. ङ. दस्य
5. ङ. श्चापि हि

राह्वारयुक्तोऽप्यथ योगदो वा
(कुर्वन्ति) भवेद्धि सर्वज्ञमतेन भङ्गम् ॥ ८ ॥

फणी व्यये योगशतापहर्ता
शुक्रेण युक्तस्त्वयुतप्रहर्ता ।
शुक्रेन्दुसर्पा व्ययभे विशिष्य
कुर्वन्ति नित्यं खलु योगनाशं ॥ ९ ॥

पूर्णार्गलानां चरभे युतौ स्यात्
योगः त्रिपादार्गलतः स्थिरर्क्षे ।
द्वन्द्वे तथार्धार्गलतोऽथवा स्यात्
पादार्गलाद्वा मनुजस्य योगः ॥ १० ॥

पूर्णार्गलः स्यात्त्रितयस्य योगे
पादोनमाहुः द्वितयस्य तद्वत् ।
एकत्र चार्धार्गलसंज्ञितः स्यात्
कोणे शुभैः पादमिति ब्रुवन्ति ॥ ११ ॥

पादार्गलानामथ संप्रवच्मि
विशेषमार्यैः मुनिभिः प्रणीतम् ।
कर्मस्थिताः शोभनखेचरेन्द्राः
चतुर्थभे चापि ग्रहै(खगै)र्वियुक्ते ॥ १२ ॥

शुभेषु कोणान्तरसंस्थितेषु
पादार्गलं तं प्रवदन्ति धीराः ।
शुभेषु जामित्रगृहस्थितेषु
त्रिकोणसंस्थेषु शुभग्रहेषु ॥ १३ ॥

योगप्रदे स्वोच्चगतेऽथवा स्यात्
पादार्गलं तत् प्रवदन्ति सन्तः ।
[1]चन्द्रस्तथा योगदसंयुतश्चेत्
व्यये शुभानां यदि सन्निवासः ॥ १४ ॥

---

1. ग. चन्द्रोऽथवा

[1]व्ययत्रिकोणे न शुभा यदि स्युः
योगो हि पादार्गलसंज्ञितः स्यात् ।

[2]मूलत्रिकोणे हि शुभा यदि स्युः
योगो हि पादार्गलसंज्ञितः स्यात् ।
पादार्गलानां द्वितयस्य योगे
बुधास्तदर्धार्गलमामनन्ति ॥ १५ ॥

योगप्रदस्य व्ययभे शुभानां
योगे तदर्धार्गलमामनन्ति ।
खेटैरनेकैर्यदि योगदः स्यात्
उक्तस्तु पादार्गलसंज्ञितः स्यात् ॥ १६ ॥

उच्चोऽथवाप्युच्चयुतोऽपि तद्व-
दितीव सर्वज्ञगुरोर्मतेन[3] ।
उच्चेन दृष्टेऽपि बलं हि केचित्
वदन्ति राशेरधिनायकैश्च ॥ ॥ १७ ॥

क्रूराश्चतुर्थर्क्षगताः शुभा वा
तृतीयषष्ठाष्टमगा[4] यदि स्युः ।
ग्रहैर्विहीनेऽप्यथकर्मभे वा
योगोऽयमर्धार्गलसंज्ञितः[5] स्यात् ॥ १८ ॥

शुभार्गलैः क्रूरखगास्तथैव
दुष्टार्गले सौम्यखगा यदि स्युः ।
तदीश्वरे वा बहुभिर्युते स्यात्
योगोऽयमर्धार्गलनामधेयः ॥ १९ ॥

---

1. च. इदमर्धमत्र नोपलभ्यते
2. क. इदमर्धमत्र नोपलभ्यते
3. ङ. सर्वज्ञमते वदन्ति ।
4. क. षष्ठर्क्षगता यदि
5. ङ. मामनन्ति

एवंविधैर्गलयोगभेदैः
युक्तः खगो योगदनामधेयः ।
लग्नं प्रपश्येद्यदि मानवस्य
धरापतेस्तुल्यबलत्वमेति ॥ २० ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्तविद्या-
वैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां
पञ्चमोऽध्यायः ॥

चरस्थिताः पादबलाः खगेन्द्राः
स्थिरे तथार्धं बलमामनन्ति ।
तथोभये पूर्णबलं खगानाम्
उच्चोऽपि पादोनबलः खगः स्यात् ॥ १ ॥

पापास्तथोच्चे विबलाश्शुभास्तु
नीचस्थिताः स्युः विबलाः प्रकामम् ।
फणीश्वरः पूर्णफलाय दुष्ट-
ग्रहैर्युतस्तत्तदुदाहरन्ति ॥ २ ॥

योगप्रदाल्लग्नपतेर्विलग्नात्
भावा विचार्या मनुजर्षभेण ।
उक्तेषु यः पूर्णबलस्तदानीं
तत्रापि साम्ये रजनीश्वराच्च ॥ ३ ॥

राहुर्विलग्नेऽप्यथवा तदीश-
युक्तोऽथवा योगदसंयुतः स्यात् ।
तथा सुधीभिः फलकांक्षिभिः स्युः
विपर्ययात् भावफलं विचार्यम् ॥ ४ ॥

[1]कृष्णीयशास्त्रे हि पुरैव भावाः
मयैव सूक्ता विदुषां हिताय ।

---

1. ङ. अयं श्लोको नोपलभ्यते

अत्रापि ते स्युः सुदृशां प्रबोध-
हेतोः फलानां मनुजर्षभाणाम् ॥ ५ ॥

वर्णाकृतिर्योगदतो नराणां
न चेद्विलग्ने बलवान् खगामी ।
[1]कृष्णीयरीत्यैव विचक्षणेन
वर्णादयः स्युः परिकल्पनीयाः ॥ ६ ॥

जामित्रनाथांशकतो हि जातिः
ख्यातिस्तथा लग्नविभागतः स्यात् ।
योगप्रदाद्वा बलिनो युताद्वा
विचार्य [2]धीमान् प्रवदेत् सभासु ॥ ७ ॥

लग्नं गतैः क्रूरखगैः नरः स्यात्
क्रूरः शुभैश्चापि शुभप्रशस्तिः ।
मिश्रैस्तथा मिश्रगुणोऽतिनीचैः
नैच्यं तथोच्चे बहुमानजीवी ॥ ८ ॥

राहौ विलग्ने पिशुनो नृशंसः
केतौ सदा धर्मगुणाभिमानी ।
शनौ सदाचारविवर्जितः स्यात्
कामी भृगौ देवपुरोहिते तु ॥ ९ ॥

ज्ञानी च वेदान्तविचारदक्षः
बुधे तु वक्ता मतिमान् गुणाढ्यः ।
कुजे परस्त्रीनिरतो विधौ तु
[3]बाल्ये कृपालुर्मधुराकृतिश्च ॥ १० ॥

दिनाधिपे कोपगरिष्ठबुद्धिः
वेदाङ्गविच्चापि सदा नरः स्यात् ।

---

1. ङ. इदमर्धं नोपलभ्यते 3. घ. भवेत्
2. ङ. विद्वान्

वित्तस्थितैः क्रूरखगैर्व्ययस्थैः
प्रक्षीणवित्तो मनुजस्तथैव ॥ ११ ॥

ग्रहव्यपेते व्ययभे धनस्थैः
क्रूरैः शुभैर्वा मनुजो धनाढ्यः ।
क्रूरैः सदा[1] क्रूरवचाः शुभैस्तु
शुभंयुवाचोविभवो नरः स्यात् ॥ १२ ॥

रवौ तु वैयाकरणो विधौ तु
साहित्यविद्याकुशलः कुजे तु ।
नैयायिकः स्याच्छशिनन्दने तु
मीमांसको देवपुरोहिते तु ॥ १३ ॥

वेदान्तवित् स्यात् भृगुनन्दने तु
कामी च साहित्यकलाप्रवीणः ।
मन्दे तु मन्दप्रकृतिः फणीन्द्रे
बलाधिके वक्रतमो बली स्यात् ॥ १४ ॥

मूको ध्वजे त्वस्फुटवाक् सदैव
योगप्रदाल्लग्नपतेः समूह्यम् ।
विद्याविशेषास्तु चतुर्थभावात्
तत्पञ्चमाच्चापि विचिन्त्यमाहुः ॥ १५ ॥

उक्तैर्युताभ्यां गुरुचन्द्रमाभ्यां
प्रबन्धकर्ता भृगुचन्द्रमाभ्याम् ।
काव्यादिकर्ता बुधचन्द्रमाभ्यां
न्यूनं ततः किञ्चिदुदाहरन्ति ॥ १६ ॥

बुधारयोरान्ध्रकविर्गुरौ च
शुक्रे तु गीर्वाणकविः शनौ तु ।

---

1. ग. क्रूरैस्तथाः

स्थिते सचन्द्रे द्रमिडः फणीन्द्रे
म्लेच्छादिभाषासु[1] सिते कविः स्यात् ॥ १७ ॥

तृतीयगैः क्रूरखगैः प्रतापी
लाभे शुभा नो यदि संस्थिताः स्युः ।
तृतीयनाथेन युते तु योग-
प्रदे प्रतापं समुदाहरन्ति ॥ १८ ॥

सम्बन्धतो योगददारपत्योः
स्नेहोऽन्यथा स्यात् विपरीतमेव ।
लग्नाधिपाल्लग्नगृहाच्च केचित्
सम्बन्धमैच्छन् कुशलं मुनीन्द्राः ॥ १९ ॥

वेश्मर्क्षगाः शोभनखेचरेन्द्राः
शुभं प्रदद्युः यदि कर्मगेहे ।
न स्युः ग्रहाश्चैवमिदं दशासु
विचिन्तनीयं विबुधा वदन्ति ॥ २० ॥

धनागमो वित्तचतुर्थलाभैः
विपर्ययः कर्मतृतीयरिःफैः[2] ।
पूर्वोक्तगेहेषु ग्रहा(खगा)त्यये स्युः
कर्मादयो व्यर्थफलप्रदाने ॥ २१ ॥

रवौ तु तार्णं गृहमाहुरार्याः
चन्द्रे तु पर्णैः गृहमामनन्ति ।
कुजे तु लोष्टादिगृहं प्रशस्तं
बुधे तु [3]भूश्वभ्रगृहं वदन्ति ॥ २२ ॥

तस्मिन् गुरौ दारुगृहं [5]भृगौ तु
विचित्रमाहुः भवनं मुनीन्द्राः ।

---

1. ग. ङ. निपुणः
2. च. नाशैः ग. नीचैः
3. च. सुधाशुभ्र
4. ग. प्रशस्तम्
5. ग. भृगौ विचित्रं भवनं वदन्ति ।

सूर्यात्मजे क्षीणशिलागृहं स्यात्
राहौ दृढं चेष्टकमामनन्ति ॥ २३ ॥

केतौ तु देवालयमण्डपादिं
वदन्ति च ज्योतिषका मुनीन्द्राः ।
प्रासादमाहुः भृगुजे सचन्द्रे
जीवेन दृष्टे स्वभुजार्जितं स्यात् ॥ २४ ॥

फणीश्वरे चान्यकृतं तदेव
रवीक्षिते राजगृहं वदन्ति ।
शनौ परप्रेष्यतया निवासोऽ-
प्येवं हि सर्वत्र विचारणीयम् ॥ २५ ॥

सुतर्क्षनाथाद्यदि योगदस्य
सम्बन्धसिद्धिः बहुपुत्रलाभः ।
तत्रापि राहौ च रवौ गुरौ च
वदन्ति सन्तः खलु निश्चयेन ॥ २६ ॥

चन्द्रे बलाढ्ये सुतभावसंस्थे
पुत्रं किलैकं समुदाहरन्ति ।
बुधर्क्षगे वा बुधसंयुते वा
दत्तः सुतः स्यात् बहुलेन्दुदृष्टे ॥ २७ ॥

शनौ तथैके मृतपुत्रवान् स्यात्
केतौ नरः स्त्रीजनकत्वमेति ।
संख्या तु संयुक्तखगैः कलाभि-
रुच्चादिभिस्तद्द्विगुणाभिवृद्धिः ॥ २८ ॥

रवौ सुतस्थे शिवभक्तियुक्तः
चन्द्रे तु देव्यां क्षितिजे कुमारे ।
विष्णौ बुधे साम्बशिवे गुरौ स्यात्
ब्रह्मात्मवादी च भृगौ तु लक्ष्म्याम् ॥ २९ ॥

नगात्मजायामथवापि भक्तिः
शनौ यमे भक्तिमुदाहरन्ति ।
दुर्गादिपूजानिरतः फणीन्द्रे
केतौ तु चण्डेश्वरपूजकः स्यात् ॥ ३० ॥

भुजङ्गराजः शुभदृष्टियुक्तः
शिवे स पापैर्यदि संयुतः स्यात् ।
विशेषपाषण्डमतिः नृशंसः
कामी भगार्चानिरतोऽथवा स्यात् ॥ ३१ ॥

राहुः शुभेनाप्यशुभेन युक्तः
दुर्गात्मकं तं नियतं वदन्ति ।
शनिर्बुधक्षेत्रगतस्तु विष्णौ
स्वर्क्षे तथा मध्वमते प्रविष्टः ॥ ३२ ॥

जीवेन दृष्टोऽप्यथवा युतो वा
रामानुजः स्यादिति सम्प्रदायः ।
शुक्रेण दृष्टोऽप्यथवा युतो वा
श्रीवेङ्कटेशे नियतो नरः स्यात् ॥ ३३ ॥

[1]बुधादिखेशात्मजगेहवासो
गोविन्दपाषण्डमतिं ददाति ।
स्वर्क्षोच्चनीचस्थितरात्रिनाथः
शिवात्मको व्योममणिस्तु नित्यम् ॥ ३४ ॥

शारीरवृत्तिर्जपशीलकर्मा
ध्यानात्मको वा हिमगुस्तथैव ।
यष्टा [2]कुजे ज्ञेऽपि च डम्भकर्मा
आचारवादीति विदुर्मुनीन्द्राः ॥ ३५ ॥

कर्मध्यानयुतः सौरिः शुक्रो राजसकर्मवान् ।
अकर्मा वा कुकर्मा वा शनिर्ध्यानात्मकः खगः ॥ ३६ ॥

---

1. च. अयं श्लोको नोपलभ्यते 2. क. ग. ङ. क्रतूनामपि

यष्टा वा सर्वयज्ञानामशक्तो वा भवेन्नरः ।
कौलो वा पतितो वापि राहुः पाषण्डकोऽपि वा ॥ ३७ ॥

[1]राहुः शुक्रयुतो दृष्ट आचार्यध्यानवान् सदा ।
शशिजात्पार्ष्णिराशिस्थादप्येवं वदतां नयेत्[2] ॥ ३८ ॥

अमात्यदासादप्येवं वदन्ति मुनयोऽखिलाः ।
शशिराशिर्ग्रहयुतः सदा तत्पार्ष्णिगैः खगैः ॥ ३९ ॥

विलग्नलग्ननाथाभ्यां योगदाद्वापि पञ्चमात् ।
उपासनाविधिश्चिन्त्यः सर्वदापि क्षितौ नृणाम् ॥ ४० ॥

तदंशः शुभयुग्दृष्टः इह जन्मनि सिद्धिदः ।
कदापि सिद्धिर्नैवास्ति[3] पापदृष्टियुतः स चेत् ॥ ४१ ॥

गुरुशुक्रनिशानाथकेतुसौम्याः शुभग्रहाः ।
[4]एभिर्दृष्टो युतांशश्चेत् इह शीघ्रेण सिद्धिदः ॥ ४२ ॥

शनिभौमभुजङ्गाः स्युः कौलधर्मानुसारिणः[5] ।
धरणीसुतमन्दाभ्यां भौमाहिभ्यां युता यदि ॥ ४३ ॥

शशिना कविना युक्तं दृष्टं वा कौलमाङ् नरः ।
गुरुणा युक्तमथवा दृष्टं वा न भवेद्यदि ॥ ४४ ॥

उक्तराशौ शुभे राहौ शनियोगे तु वैदिकः ।
केत्वादित्यजयोर्योगे शैवो वा वैदिकोऽथवा ॥ ४५ ॥

गुर्वादित्यजयोर्योगे भवेत् वैदिकवैष्णवः ।
राहुभूमिजयोर्योगे योगे वा शनिभौमयोः ॥ ४६ ॥

पाषण्डी केतुकुजयोः योगे स्यान्मान्त्रिकः पुमान् ।
आभिचारककर्ता वा पापिष्ठो वा भवेन्नरः ॥ ४७ ॥

---

1. च. स राहुः शुभयुक् । ग. सराहुश्शुक्रयुक्
2. घ. नरः
3. ग. न स्याद्धि
4. ङ. इदमर्धं न दृश्यते
5. ङ. क्रूरा इति गुरोः मतम् ।

योगे तु [1]शनिकेत्वोस्तु जातः शैवो भवेन्नरः ।
उपासको हरेस्सूनोः हरस्याप्यथवा भवेत् ॥ ४८ ॥

उक्तराशिर्गुरुयुतो गुरुराशिस्तु वा पुनः ।
केवलेनाथ शशिना दृष्टो वा संयुतोऽपि वा ॥ ४९ ॥

अन्यो यद्युक्तराशिस्तु गुरुराशिगतोऽथवा ।
शशिनाथ युतो दृष्टो वैष्णवो भवति ध्रुवम् ॥ ५० ॥

शशिभास्करयोर्योगे शिवदीक्षापरो नरः ।
योगे तु केतुशशिनोः शूलिन्याः स्यादुपासकः ॥ ५१ ॥

वैदिको वाथ शैवो वा योगे तु शशिसौम्ययोः ।
योगे वा शशिगुर्वोस्तु ब्रह्मज्ञानी भवेन्नरः ॥ ५२ ॥

योगे तु शुक्रशशिनोरैहिकार्थ उपासकः ।
देव्यास्तत्र तु योगे स्यात् संन्यासी गुरुभौमयोः ॥ ५३ ॥

केतुश्चेत्तत्र भण्डारी नरो वाप्यवधूतकः ।
लाटः स्यात्तत्र पापर्क्षे योगे वा राहुमन्दयोः ॥ ५४ ॥

तत्र तौ गुरुदृष्टौ चेत् विरक्तो वा यतिस्तु वा ।
गुरुराह्वोः समायोगे चण्डालैः सह पूजकः ॥ ५५ ॥

एवं सुतर्क्षादुक्तोच्चग्रहैः विद्वान् बलाबलम् ।
विनिश्चित्य फलं ब्रूयात् कदापि न मृषा भवेत् ॥ ५६ ॥

॥ इति श्रीबालात्रिपुरसुन्दरी कृपाकटाक्षसमधिगतसमस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां षष्ठोऽध्यायः ॥

षष्ठाधिपाद्योगदखेचरस्य
संबन्धतः सैनिकनायकः स्यात् ।
योगप्रदे षष्ठपतौ तथा स्या-
देवं दशायामपि [2]वीक्ष्यमाहुः ॥ १ ॥

---

1. ग. गुरुराह्वोस्तु 2. ग. योज्य

तत्र स्थिताः पापखगाः पुमांसः
कृष्यादिसञ्जीवनमाचरन्ति ।
[1]शन्यारसर्पा विषमप्रदेशे
गिरौ तथा काननसीम्नि च स्यात् ॥ २ ॥

चन्द्रेण दृष्टे सलिलप्रदेशे
शुक्रेण चैवं मुनयो वदन्ति ।
गुरौ जलप्रायतटे सचन्द्रे
राहौ शिलाप्रायतटे वदन्ति ॥ ३ ॥

योगप्रदात् केन्द्रगतो यदि स्यात्
षष्ठाधिनेता प्रबलः कृषौ स्यात् ।
त्रिकोणसंस्थोऽपि बली धनाढ्यः
केमद्रुमं नाशगतं वदन्ति ॥ ४ ॥

योगप्रदः सप्तमपो यदि स्यात्
सम्बन्धयोगाद्बहुदारपः[2] स्यात् ।
अंशादिसम्बन्धवशाद्विशिष्य
संख्याविभागं प्रवदन्ति तज्ज्ञाः ॥ ५ ॥

तत्रैव चन्द्रे वनिता सुशीला
सुरूपिणी शुक्रयुतेऽपि तद्वत् ।
गुरौ सचन्द्रे च सुलक्षणाढ्या
कलावती स्याद्वणिजेति केचित् ॥ ६ ॥

वयोधिका स्याच्छनिना कुरूपा[3]
तपस्विनी वाप्यथ रोगिणी वा ।
पत्या विहीना भुजगे तु केतौ
कुरूपिणी चापि तथा वदन्ति ॥ ७ ॥

---

1. च. शन्यारदृष्टे
2. च. ङ. दारवान्
3. ग. वधूटी

यद्यष्टमस्थौ फणिभूमिपुत्रौ
वदन्ति मृत्युं किल शस्त्रघातैः ।
तत्रैव मन्दे सविधौ तु वात-
रोगेण मृत्युं लभते ध्रुवं हि ॥ ८ ॥

रवौ नृपात्सर्पयुते विनाशं
चन्द्रेण मृत्युं भुवि राजरोगात्[1] ।
कुजे व्रणाच्चन्द्रसुते च केतौ
विषूचिकाद्यैर्निधनं वदन्ति ॥ ९ ॥

क्षीणेन्दुदृष्टे निधने कुजे स्यात्
सर्पेक्षिते तु कृमिसम्भवोऽपि ।
क्रूरेण युक्तेन बुधेन सन्तः
दुर्गन्धवृद्धिं समुदाहरन्ति ॥ १० ॥

शुभावलोकेन न दोष एषः
विपर्यये त्वेवमुदाहृतं स्यात् ।
पितुः पतेः योगदखेचराच्च
सम्बन्धतः स्यात् पितृवित्तलाभः ॥ ११ ॥

तत्र स्थितैस्स्यात् शुभखेचरेन्द्रैः
धर्माभिवृद्धिं गुरुदेवभक्तिम् ।
[2]अन्यच्च सर्वं मतिमान् विचार्य
फलं सभायां प्रवदेदतन्द्री ॥ १२ ॥

कर्मादयः पूर्वमुदीरता ये
तथैव दुष्टार्गलमन्तरेण ।
फलप्रदाः तत्पतिभिः सहैव
सम्बन्धतो योगदखेचरस्य ॥ १३ ॥

---

1. घ. ङ. यक्ष्मात 2. ग. इदमर्धमत्रैव दृश्यते

संक्षेपतो ग्रन्थतया मयोक्तं
विस्तारतः तन्मतिमान् विचार्य ।
[1]गुरूपदेशान्नृपतेः सभासु
वक्तव्यमत्यद्भुतशास्त्रमेतत् ॥ १४ ॥

एवं विलग्नादपि योगदाच्च
[2]विलग्ननाथाच्च विचिन्तनीयम् ।
[3]पदाच्च वाञ्छन्ति परे मुनीन्द्राः
बली तु सर्वत्र फलप्रदः स्यात् ॥ १५ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्तविद्या-
वैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां
सप्तमोऽध्यायः ॥

राशेः द्रगाणादथवांशकाच्च
द्रष्टा विलग्नं यदि योगदः स्यात् ।
राशेरथांशाच्च स एव राशेः[4]
द्रेक्काणतोऽप्येवमुदाहरन्ति ॥ १ ॥

द्रष्टा खगो राशिवशाद्विलग्नं
पश्येत् खगः केवलनामधेयः ।
योगप्रदः केवलसंज्ञितो वा
लग्नं प्रपश्येद्यदि योगवान्[5] स्यात् ॥ २ ॥

विहाय दृष्टिं भुवि योगदस्य
न योगशङ्कापि धरातलेऽस्मिन् ।
तत्तत्समादाय नरेन्द्रयोगं
संक्षेपतो वच्मि मुनिप्रणीतम् ॥ ३ ॥

---

1. ङ. इदमर्धं न दृश्यते
2. ङ. नाथाच्च वाञ्छन्ति पदाच्च केचित्
3. ङ. इदमर्धं न दृश्यते
4. च. शत्स भवेच्च राशेः
5. च. योगदः

लग्नं द्रगाणं यदि योगखेटं
एको रविः पश्यति चेत्तदानीम् ।
राजा शशी चेन् नृपतिः कलावान्
कुजे त्वरण्याश्रयभूपतिः स्यात् ॥ ४ ॥

बुधे तु वाणिज्यपरो नृपालः
गुरौ तु विप्रामरभक्तियुक्तः ।
शुक्रे तु कामी रसखण्डभूमी-
पतिः शनौ क्षुद्रमहीपतिः स्यात् ॥ ५ ॥

राहौ गिरीन्द्राश्रयभूमिनेता
केतौ तु शून्यक्षितिनायकः स्यात् ।
एतत्फलं विप्रमुखादिवर्ण-
चतुष्टयानां मुनिभिः प्रणीतम् ॥ ६ ॥

म्लेच्छोद्भवानां तु विशेषतोऽद्य
वक्ष्ये विपश्चित्सुखकारणाय ।
फणीश्वरो भूमिजमन्दगेहे
स्थितो बली पश्यति योगदाता ॥ ७ ॥

लग्नं द्रगाणं त्वथवा त्रिकोणं
सर्वसहामण्डलचक्रवर्ती ।
स एव चन्द्रेण युतेक्षितोऽपि (युतोऽथ दृष्टो)
द्वीपान्तरे स्यान् नृपतिः धनाढ्यः ॥ ८ ॥

भौमादिभिः क्रूरखगैर्युतोऽपि
[1]दृष्टः क्वचित् भूतलनायकः स्यात् ।
शुभेन युक्तोऽपि शुभर्क्षगो वा
शुभेक्षितो वापि बली फणीन्द्रः ॥ ९ ॥

एको बली क्रूरखगेन युक्तः
मध्योऽन्यथा स्याद्विपरीतमेव ।

1. ग. क. नूनं

दृष्टिः शुभानां भुजगेश्वरस्य
विप्रादिकानां फलसिद्धये स्यात् ॥ १० ॥

द्विव्यादिखेटेक्षणतो धरायाः
क्वचित् पतिः स्यादपि योगदातुः ।
शन्यारसर्पा विषमार्गलानां
योगेऽपि खण्डप्रभुताप्रदाः स्युः ॥ ११ ॥

अन्ये तु दारिद्र्यसमुद्रमग्नान्
कुर्वन्ति दत्वापि धनं तदन्ते ।
लग्नाद्विलग्नाधिपतिर्गरीयान्
ततो द्रगाणो धनदोऽपि कर्ता ॥ १२ ॥

ग्रहैरनेकैः यदि योगदाता
युतस्तदानीं प्रभुयोग एव ।
यद्यर्गले स्युः शुभखेचरेन्द्राः
तथा नरेन्द्रस्य समो विभुः स्यात् ॥ १३ ॥

मिश्रे च मिश्रं विपरीततः स्यात्
विपर्यये नीचखगैर्विनाशः ।
उच्चैस्तथात्युन्नतराजयोगः
क्रूरैर्युतः स्यात् मृदुता विभुत्वे ॥ १४ ॥

चाञ्चल्ययोगः चरसंस्थिते स्यात्
स्थिरत्वमाहुः स्थिरभे ग्रहेषु ।
तथोभयस्थेषु बलाधिकत्वं
विचक्षणो वीक्ष्य वदेत् सभासु ॥ १५ ॥

तथाष्टमस्थेषु भवेद्विभङ्गः
क्रूरेषु केन्द्रेषु भवेद् दृढत्वम् ।
त्रिकोणसंस्थेषु च योगहानिं
व्ययस्थितेषु व्ययमाहुरार्याः ॥ १६ ॥

क्रूरा युता योगकरेण कुर्युः
क्रूरं दुराचारमुपात्तगन्धम् ।
लग्नाधिपे योगकरे प्रसिद्धः
धनाधिपे स्याद्धनिकोऽपि वक्ता ॥ १७ ॥

तृतीयपे भ्रातृधनोपभोक्ता
चतुर्थपे भूषणवान् सुखाढ्यः ।
योगोन्नतः पञ्चमपे मनीषी
[1]पुत्रादितो द्रव्यसुखप्रशस्तिः ॥ १८ ॥

षष्ठाधिपे शत्रुधनोपजीवी
दाराधिपे स्त्रीधनसौख्यजीवी ।
रोगेश्वरे निर्धनवान् दरिद्रः
भाग्येश्वरे भाग्यविवृद्धपुण्यः ॥ १९ ॥

कर्मेश्वरे कर्मरतो धनाढ्यः
लाभेश्वरे पूर्णधनः समृद्धः ।
व्ययेश्वरे निर्धनिको दरिद्रः
इतीव सर्वज्ञगुरोर्मतेन ॥ २० ॥

एवं गुणैर्योगखगं निरीक्ष्य
बलानुसारेण वदेत् फलानि ।
लग्नं न पश्येद्यदि योगखेटः
लग्नत्रिकोणेषु विचिन्तनीयम् ॥ २१ ॥

लग्नत्रिकोणो यदि पापयुक्तः
पश्येच्च तं योगखगस्तदानीम् ।
योगस्य भङ्गं प्रवदन्ति धीराः
शुभेन युक्तस्तु शुभं ददाति ॥ २२ ॥

दशाविभागेन विचारणीयः
कालोऽपि दैवज्ञवरैः विशिष्य ।

---

1. च. ग. क. प्राज्ञः सुत ।

दशाविभागेषु च राजयोगं
परत्र वक्ष्ये फलकारणाय ॥ २३ ॥

होरां घटिं वा यदि वा विलग्नं
पश्यन् हि योगाय भवेत् खचारी ।
उच्चोऽपि वा नीचविलोकनेन
योगस्य हानिं प्रवदन्ति सन्तः ॥ २४ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां अष्टमोऽध्यायः ॥

उच्चे शुभे वा धनभावसंस्थे
तृतीयभे नीचखगे शुभे वा ।
चतुर्थराशौ शुभखेचरे वा
स्वोच्चग्रहे पञ्चमभे शुभोच्चे ॥ १ ॥

क्रूरेऽथवा नीचखगे च षष्ठे
शुभे तथा सप्तमभावसंस्थे ।
तथाष्टमस्थेष्वशुभेषु तस्मात्
परत्र सौम्ये नृपतेः समः स्यात् ॥ २ ॥

शुभो द्वितीयेऽथ ततोऽनु नीचः
क्रूरोऽथवा सौम्यखगः चतुर्थे ।
ततोऽनु नीचस्तदतः शुभश्च
ततोऽशुभः तत्परतः शुभोच्चः ॥ ३ ॥

ततोऽनु पापः खगमो रसायाः
पतिर्भवेत् योगकराद्विलग्नात् ।
खेटाभावे चन्द्रतो ग्राह्यमेतत्
सर्वं ग्राह्यं स्याद्दशास्वेवमेव ॥ ४ ॥

लग्नांशे स्यात् पापयुक्ते तदीशे
नीचे क्रूरे क्रूरयुक्ते विलग्ने ।

तूष्णींभूतो योगदाता न पश्येत्
रोगी जातो भाग्यहीनो विशिष्य ॥ ५ ॥

लग्नेशाद्वा योगदाद्वा द्वितीये
क्रूरे तादृक्चाष्टमे राहुवर्जम् ।
सौम्येष्वेवं नाशगेहे प्रजातः
वित्तैर्हीनो भिक्षुकः स्यान् मनुष्यः ॥ ६ ॥

चन्द्रे नीचे नीचखेटे च भावे
तूष्णींभूते योगदे चारिगेहे ।
दुष्टस्थाने भोगिनाथेन दृष्टे
रोगी जातो भाग्यहीनो नरः स्यात् ॥ ७ ॥

आरूढाद्वा योगदाद्वा व्ययस्थैः
खेटैरन्यैः भोगिशुक्रेन्दुयुक्ते ।
लाभस्थानाद् दुष्टभावे ग्रहाणां
राज्ञो मूलाद् द्रव्यनाशं वदन्ति ॥ ८ ॥

आरूढे वा क्रूरखेटे व्ययस्थे
राहौ चन्द्रे लाभसंस्थे सशुक्रे ।
योगाधीशेऽप्यर्गलैः संयुते वा
मध्ये मध्ये योगभङ्गं वदन्ति ॥ ९ ॥

वित्तस्थाने क्रूरखेटाद्यभावे
नाशस्थाने सौम्यखेटैः युते स्यात् ।
त्यागी भोगी दानशीलः प्रजावान्
लग्नादेवं योगदाच्चिन्तनीयम् ॥ १० ॥

योगाधीशात्कोणयोः दुष्टखेटे
नाशस्थाने वा व्यये चैवमेव ।
भावस्थाने क्रूरखेटास्तदानीं
बन्धैर्मृत्युं ज्योतिषज्ञा वदन्ति ॥ ११ ॥

कर्मस्थाने वेश्मगेहे च दुष्टाः
लाभस्थाने चेत् तृतीयेऽथवा चेत् ।
नीचे सौम्ये क्षीणचन्द्रे नराणां
बन्धः प्रोक्तो दीर्घकालं मुनीन्द्रैः ॥ १२ ॥

उच्चैर्दृष्टे स्यान्निरोधस्य नाशः
नीचैर्दृष्टे शृङ्खलादिप्रहारः ।
सौम्यैर्दृष्टे स्यान्निरोधेऽपि सौख्यं
द्रष्टव्यं स्यादेवमेवं दशासु ॥ १३ ॥

नीचैः पापैर्वर्षसंख्या शुभैस्तु
मासाः प्रोक्ताः पापखेटैस्तथोच्चैः ।
सौम्यैश्शुद्धैर्वासराः स्वोच्चसंस्थैः
नाड्यो वा स्युर्वाग्व्यथा वा निरोधे ॥ १४ ॥

क्षीणे चन्द्रे बन्धनं पाशमुख्यैः
पूर्णे चन्द्रे बन्धनं [1]वस्त्रतः स्यात् ।
राहौ तु स्याच्छृङ्खलाभिः सशुक्रे
भौमे तु स्याच्चर्मपाशेन बन्धः ॥ १५ ॥

सूर्ये वार्तामात्रमाहुः मुनीन्द्राः
क्रूरैर्युक्ते दर्शनं वा कदाचित् ।
चन्द्रापत्ये हस्तमुष्टिप्रहारः
क्रूरैर्युक्ते दारुभिः पादघातः ॥ १६ ॥

शुक्रे नीचे क्रूरखेटेन दृष्टे
श्मश्रुछेदं राजकोपाद् वदन्ति ।
जीवे तु स्याद्भीषणो वाक्प्रपञ्चः
चैवं योज्यं स्याद्दशायां सुधीभिः ॥ १७ ॥

भावे चन्द्रे नीचखेटेन दृष्टे
क्रूरैर्भौमाद्यैः भुजङ्गेन युक्ते ।

---

1. च. तस्य नास्ति

शुक्रे नीचे दुर्बले चाद्वितीये
राजक्रोधान् नेत्रहानिं वदन्ति ॥ १८ ॥
क्रूरैः खेटैः पञ्चमस्थैस्सशुक्रैः
भावस्थाने नीचखेटे विधौ वा ।
योगेशाद्वा दुष्टसंज्ञार्गलस्थे
राजक्रोधात् गर्दभारोहणं स्यात् ॥ १९ ॥
एवं योज्यं लग्ननाथाद्विलग्नात्[1]
द्रेक्काणर्क्षाद्योगदाच्च प्रयत्नात् ।
भूष्णुः ज्ञात्वा सर्वमेतद्दशायां
सौम्यालोकैः सम्भवेयुः शुभानि ॥ २० ॥

॥ इति श्रीबालात्रिपुरसुन्दरी कृपाकटाक्षसमधिगतसमस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न मालायां नवमोऽध्यायः ॥

॥ अथ लग्नभेदाः ॥

चन्द्रस्य लग्नाधिपतेश्च भागान्
संयोज्य तद् द्वादशधा विभज्य ।
लग्नेशभागैः सह योजयित्वा
प्राप्तं भवेत् त्रिप्रवणं हि लग्नम् ॥ १ ॥
तस्मिन् शुभे स्वोच्चखगे धरायाः
पतिर्भवेत् पापखगे दरिद्रः ।
मिश्रे च मिश्रं फणियोगतः स्यात्
मृत्युः शिशुत्वे भयमम्भसः स्यात् ॥ २ ॥
विभज्य नक्षत्रमथो विलग्नात्
आरभ्य नीत्वा रविणैव धीमान् ।
प्राप्ते तु खण्डे तु दशाधिनाथ-
माद्यं समारोप्य वदेत्फलानि ॥ ३ ॥

---

1. ङ. नाथाद् द्रगाणात्

तत्रोच्चगोऽप्युच्चयुतः शुभेन
युतोऽथवा स्यात् प्रभुयोगदाता ।
नीचेऽपि वा नीचयुतेन दृष्टे
दारिद्र्यमाहुः प्रवणा मुनीन्द्राः ॥ ४ ॥

आरभ्य तत्तत् तदनुक्रमेण
दशामधीशात् परिकल्पयित्वा ।
शुभाशुभं सम्यगवेक्षणीयं
द्विपापयोगे मृतिरेव वाच्या ॥ ५ ॥

लग्ने गतान् योगकरस्य भागान्
राशिं च संयोज्य रविक्रमेण ।
वियोज्य लग्नादि तदेव लग्नं
शुभाय कल्प्यं विबुधैः प्रयत्नात् ॥ ६ ॥

त्रिकोणसंस्थे शुभमन्यथा स्यात्
विपर्ययेऽन्यत् खलु पूर्ववत् स्यात् ।
आरूढतोऽपि प्रविचिन्तनीयं
शुभैः शुभं स्याद्विपरीतमन्यैः ॥ ७ ॥

लग्नेशितुः सप्तमपस्य भागान्
संयोज्य राशिक्रमतो वियोज्य ।
प्राप्ताद्विलग्नादपि सौम्ययोगे
योगं वदेत् खेटबलेन विद्वान् ॥ ८ ॥

द्रगाणतो [1]वापि वदेत् परत्र
तदंशकादेवमुदीरयन्ति ।
एतैर्विलग्नैरपि चिन्तनीया
दारादिभावा विबुधाग्रगण्यैः ॥ ९ ॥

भागाधिपस्यापि विधोश्च लग्नान्[2]
संयोज्य पश्चान्नवधा विभज्य ।

---

1. घ. ऽपि प्रविचिन्तनीयम् 2. च. क. भागान्

चरत्रिकोणादिनवांशरीत्या
नीतेंऽशलग्नं विबुधा वदन्ति ॥ १० ॥
नीचैस्तथोच्चैः शुभखेचरैर्वा[1]
दृष्टेंऽशलग्नं च शुभाय भावि ।
अस्माच्च चन्द्रांशदशां विचिन्त्य
मनीषिणो नित्यमुदाहरन्ति ॥ ११ ॥
लग्नत्रिकोणेशकलाः सुधांशु-
त्रिकोणराशीशकलाविशेषैः ।
संयोज्य चन्द्रादिरविक्रमेण
लग्नं वियुक्तं भवतीन्दुलग्नम् ॥ १२ ॥
शुभेषु तत्र स्थितिमत्सु योगं
वदन्ति सन्तो नृपतेःसमानम् ।
विपर्ययात् राहुयुते सुधांशौ
क्रमेण नो चेत् परिचिन्तनीयम् ॥ १३ ॥
अत्रैव नीचो यदि लग्नसंस्थः
राजाधिराजः शुभखेचरे तु ।
कोटीश्वरोऽप्युच्चखगे तु लक्ष-
सङ्ख्याधिकारी खचरैर्विहीने ॥ १४ ॥
दरिद्रजीवी शुभखेचरेन्द्रैः
स्थितैः प्रभुः स्याद्बहुभिर्विशिष्य ।
क्रूरैर्धनी विक्रमवान् गुणज्ञः
तस्मादवश्यं परिचिन्तनीयम् ॥ १५ ॥
वक्तव्यमत्रास्ति विचिन्त्य सर्वं
तथापि धीमान् नृपतेः सभासु ।
वक्तव्यमत्युत्तममेतदेव
लग्नं शिवेनैतदुदीरितं मे ॥ १६ ॥

1. ङ. चरेन्द्रैः

तिर्यङ्मनुष्यामररुद्रविष्णु-
ब्रह्मादिमानामपि तद्विचिन्त्यम् ।
[1]ग्रन्थैरनेकैरलमेतदेव
वरं सभास्थानजयाय धीराः ॥ १७ ॥
[2]सुखाय वक्ष्ये भुवि बालकानां
फलार्थिनां जातकदर्शनेन ।
विभज्य राशीन् विकलाः कलाश्च
संयोज्य राशीश्वरशुक्रभागान् ॥ १८ ॥
नीत्वा हि राशिक्रमतो विभागान्
आनीय राह्वादि सुतर्क्षतो वा ।
[3]श्रीलग्नमालोच्य ततस्त्रिकोणे
शुभैः शुभानि प्रवदेदयत्नात् ॥ १९ ॥
केचित्तु राहुस्थितिभं विलग्नं
परे तु लग्नेशयुतं विलग्नम् ।
होरां परे चन्द्रयुते विलग्नं
परे घटीलग्नमिति ब्रुवन्ति ॥ २० ॥
संवादतो द्वित्रिविलग्नभेदैः
शुभाशुभानि प्रवदेत् सभासु ।
एतानि लग्नानि भृगोस्तनूजात्
प्राप्तानि सर्वज्ञमुनीश्वरेण ॥ २१ ॥

**॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-
विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-
मालायां दशमोऽध्यायः ॥**

संपद्दशाः सप्तदश प्रदिष्टाः
मुनीश्वरैः कालविदां सुखाय ।

---

1. ङ. इदमर्धं नोपलभ्यते, 2. ङ. इदमर्धमपि न दृश्यते.
3. ग. स्त्रीलग्नम् -

ता एव वक्ष्ये तरुणेन्दुचूड-
कृपाकटाक्षेण यथार्थवृत्तिः ॥ १ ॥
योगार्धनाम्ना च दशा विचिन्त्या
चरस्थिरद्वन्द्वयुतान् विभज्य ।
द्विधा च सप्ताष्टनवक्रमेण
विलग्नभादित्यवदन् मुनीन्द्राः ॥ २ ॥

तत्र फलम् ।

[1]सौम्येक्षिते स्वोच्चखगेन दृष्टे
दृष्टे शुभैः केन्द्रदशासु सन्तः ।
पूर्णं बलं मध्यममाहुरार्याः
त्रिकोणराशावधमं तदन्ते ॥ ३ ॥
[2]दशा द्वितीया खलु संप्रयोज्या
क्रमेण षष्ठक्रमतश्च केन्द्रात् ।
चरस्थिरद्वन्द्वविशेषतोऽयं
न्यायो मुनीन्द्रैः कथितः पुरैव ॥ ४ ॥
चरे विलग्ने तु ततः स्थिरे तु
चरत्रिकोणात् बलिनोऽपरस्मिन् ।
एवं नयेत् बुद्धिबलेन धीमान्
विचार्य सर्वं प्रवदेन् नराणाम् ॥ ५ ॥

इयं प्रदक्षिणयोगार्धदशा । संयोगविभागौ चरदशायामेकः ।
चरदशावर्षाणि उत्तरत्र वक्ष्यन्ते । इयमन्या योगार्धदशा ॥
मेषादिषट्के तु ततस्तदीशपर्यन्तवर्षेण पुनश्च योज्यम् ।
तुलादिषट्के तु ततश्च मीनपर्यन्तवर्षेण खगैः स्वसंस्थैः ॥ ६ ॥
द्वादशसंख्या नेया तेभ्यस्सप्ताष्टनव च संयोज्या ।
द्वेधा भङ्क्त्वा प्राप्ता योगदशेयं मुनीश्वरैः प्रोक्ता ॥ ७ ॥

---

1. ङ. इदमर्धं नोपलभ्यते 2. ङ. इदमर्धं न दृश्यते

ओजे लग्ने तत्स्यात् युग्मे लग्ने तत्सन्मुखं ग्राह्यम् ।
स्त्रीणामेतत्सर्वं विपरीतं ग्राह्यमेव मुनिवर्यैः ॥ ८ ॥

॥ अथ फलकथनप्रकारः ॥

चन्द्रः चतुर्थपञ्चम नवमसंस्थोऽथवा यस्याम् ।
[1]राहुः तत्र दशायां राज्यप्राप्तिं नरस्य कालज्ञाः ॥ ९ ॥
[2]केन्द्रत्रिकोणसंस्थो दृष्टोऽप्यथवा सुधाकरो यस्याः ।
तस्यामाहुर्योगं नृपतेः योगोद्भवस्य मनुजस्य ॥ १० ॥
अत्र तु सौख्यकराः स्युः द्रष्टारो देवपूज्यभृगुचन्द्राः ।
केतुबुधौ च तथोच्चौ त्वन्ये क्लेशप्रदाः खेटाः (हि विज्ञेयाः) ॥ ११ ॥
विस्तरभयान्मयेदं वक्त(व्यमत्र) नोच्यते सर्वम् ।
धीमान्विचार्य सर्वं ब्रूयाल्लोके मृषा न किञ्चिदिदम् ॥ १२ ॥
लग्नाधिपाद्य ओजे खेटः पश्चात्स एव धातात्र ।
तस्मिन् स्वोच्चगते वा शुभर्क्षगे वा भवेन्नरो धनिकः ॥ १३ ॥
शत्रुगृहे निर्धनः स्यात् नीचगतो रोगकारकः प्रोक्तः ।
दारिद्र्यं क्रूरयुते तस्मान्नेया तथैव योगार्धा ॥ १४ ॥
चरभे क्रमेण नेया स्थिरभे षष्ठक्रमेण केन्द्रवशात् ।
उभये फलं तु तस्मात् पदतो दृष्टत्रिकोणगैर्वाच्यम् ॥ १५ ॥
धातुर्भावाः योज्याः पदमपि तद्वद्विचार्य दैवज्ञः ।
मातुः पितुस्तथैवं दशया परया वदेत् फलं सम्यक् ॥ १६ ॥
आरूढाद्योगार्धां दशां नयन्ति क्रमेण दैवज्ञाः ।
तस्मिन् ह्योजे तस्माद्युग्मे तत्सन्मुखं ग्राह्यम् ॥ १७ ॥
चरभे स्थिरोभययोः क्रमेण कथयेत् फलानि शुभयोगात् ।
वेश्मनि सुते [3]शुभोच्चे राजा स्यात् राजयोगसञ्जातः ॥ १८ ॥
गुरुचन्द्रशुक्रदृष्टौ पुत्रोत्पत्तिं तु योगिनो ब्रूयुः ।
क्रूराहिदृष्टियोगे निर्धनं ब्रूयात् कदापि न मृषा स्यात् ॥ १९ ॥

---

1. ङ. इदमर्धं न दृश्यते
2. ङ. इदमप्यर्धं नोपलभ्यते
3. शुभाश्चेत् ।

एवं दशानां शुभतारतम्यात् संवादतः संसदि बुद्धिशाली ।
आलोच्य सर्वं प्रवदेत्कदापि मृषा भवेन्नैव [1]स जीव एव ॥ २० ॥

[2]इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायामेकादशोऽध्यायः ॥

योगार्धायां भुक्तिक्रमतो राशिक्रमेण वा ज्ञेया ।
अन्ये नवांशरीत्या केचित् द्रेक्काणतोऽपि जगुः ॥ १ ॥
अंशविभागस्त्वोजे क्रमेण युग्मे तु विपरीतम् ।
राश्यंशकानि क्रमतः वदन्ति मुनयोऽखिलशास्त्रज्ञाः ॥ २ ॥
द्रेक्काणं द्वादशधा विभज्य राशिक्रमेण पदयोगात् ।
आनीय खेचरे तु प्रकृतादृक्षान् नयन्ति तत्त्वज्ञाः ॥ ३ ॥
[3]राशौ बलेन युक्तः राहुर्यदि संस्थितो तदा तस्याम् ।
अन्ते गृहादिनाशं राजभयं देहविप्लवं कुरुते ॥ ४ ॥
तत्रैव भौमयुक्ते गृहदाहं व्रणभयं सदा भीतिम् ।
मध्ये भङ्गं शनिना विधुना क्षीणेन नृपकलहम् ॥ ५ ॥
गुरुबुधभृगुपूर्णसुधाकरराश्यधिपैर्योगदेन संयुक्तः ।
राशिः कुरुते भूपं नयगुणपूर्वं दशां च पुण्यबलाम् ॥ ६ ॥
जीवो यत्र दृगाणे सौम्ये कुर्यात् शुभानि तत्खण्डे ।
क्रूरेऽपि तद्वदेवं द्वययोगे सर्वमेव विचिन्त्यं स्यात् ॥ ७ ॥
उक्तो न्यायो ग्राह्यः दशाविपाकेषु सर्वत्र ।
अशुभमवश्यं वाच्यं दशावसानेषु दैवज्ञैः ॥ ८ ॥

॥ [4]इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्तविद्या-वैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालाया-मेकादशोऽध्यायः ॥

अथ प्रसिद्धं हूयुडुदायभेदं
वक्ष्ये बुधानां हितकारणाय ।

---

1. च. कदाचिदेषः
2. च. क.ख. इदं नोपलभ्यते
3. ङ. श्लोकद्वयं नोपलभ्यते
4. ङ. ग इदं नोपलभ्यते

पूर्वं मयोक्तः खलु योगदाख्यः
ततः सुधांशोर्बलिनो हि नेयाः ॥ १ ॥

त्रिकोणसंस्थैरपि रन्ध्रसंस्थैः
रिष्फस्थितैश्चापि शुभैः शुभाः स्युः ।
तत्र स्थितैः क्रूरखगैः विरोधः
[1]नीचैस्तु नैच्यं समुदाहृतं स्यात् ॥ २ ॥

चन्द्रात्तथा योगदसंज्ञिताद्वा
भुजङ्गराजो यदि संयुतः स्यात् ।
नयेद् दशास्ता विपरीततो हि
क्रमेण केतौ कथयन्ति तज्ज्ञाः ॥ ३ ॥

पापैर्युतो नीचखगैः त्रिकोणः
दशेशराशिर्यदि रोगपेन ।
मृतिस्तदानीमथवार्थहानिः
मिश्रे तु मिश्रं विपरीतमन्यैः ॥ ४ ॥

भुक्तिक्रमेणायुजि युग्मराशौ
वदन्ति सन्तो विपरीतभावान्
भुक्तौ तु तद्वच्च फलानि सर्व-
मन्यत् प्रसिद्धं [2]पुनरन्यशास्त्रैः ॥ ५ ॥

एवं दशा लग्नपतेश्च योज्या
फलानि चैवं हि विशेष एषः ।
चतुर्थराशावथ पञ्चमे वा
शुभोच्चयोगे शुभमेव सर्वम् ॥ ६ ॥

चन्द्रे च योगप्रदखेचरे च
चरे क्रमेण स्थिरभे च तद्वत् ।
षष्ठक्रमेणोभयभे च केन्द्रा-
दिति प्रयोज्या खदशा हि धीरैः ॥ ७ ॥

---

1. ग. नीचस्थितैः नैच्यमुदाहृतं 2. च. हि नरस्य कुर्यात्

केन्द्रत्रिकोणोपचयैः फलानि
शुभैः शुभानि प्रवदेन् नराणाम् ।
क्रूरैस्तथा नीचखगैश्च हानिं
पापद्वये मृत्युमुदाहरन्ति ॥ ८ ॥

क्षीणोऽपि चन्द्रः शुभ एव चास्मिन्
दशाविपाके तु बुधस्तथैव ।
ध्वजस्तु निर्याणविधौ विरोधी
विशिष्य सूर्योऽपि तथैव मान्यः ॥ ९ ॥

भागान् दशेशस्य च शीतरश्मेः
कलाक्रमेण प्रतियोज्य विद्वान् ।
राशिक्रमात् खेटविशेषतो वा
वियोज्य शिष्टः खलु लग्नराशिः ॥ १० ॥

तस्माद्दशा सा खदशा क्रमेण
विपश्चिता संप्रतिपादनीया ।
शुभैस्तथा स्वोच्चगतैः शुभं स्यात्
क्रूरैस्तथा नीचगतैश्च हानिः ॥ ११ ॥

यत्र स्थितो भोगिपतिस्तदानीं
विशिष्य हानिः विभवस्य वाच्या ।
क्षीणेन्दुदृष्टेऽप्यशुभेन युक्ते
मृत्युं मनःक्लेशमुदाहरन्ति ॥ १२ ॥

दशासु सर्वास्वपि योजनीयो
न्यायः प्रयत्नेन विचक्षणेन ।
शुभैर्युतः शोभनखेचरेन्द्रैः
युतश्च पश्चाच्छुभदः [1]स राशिः ॥ १३ ॥

नीचेन दृष्टोऽपि च राहुदृष्टः
क्रूरैर्युते पृष्ठखगैः च हानिः ।

---

1. च. तदा स्यात्

तदीशितुः द्वित्रिचतुष्टयेषु
शुभोऽपि यस्याथ शुभानि कुर्यात् ॥ १४ ॥
तस्यां दशायामपि योगमाहुः
नीचे तदीशेऽपि मुनीन्द्रवर्याः ।
योगाधिपे नीचगते च नैच्य-
मुच्चं गते तून्नतवंशजन्मा ॥ १५ ॥
नीचं विना स्वोच्चखगेन दृष्टः
तद्वत्पदादित्यपरे वदन्ति ।
उच्चेन चन्द्रेण युतोऽपि दृष्टः
नीचोऽपि सर्वत्र बली खगः स्यात् ॥ १६ ॥
मुनीश्वराणां हृदयङ्गमेयं
दशा मयोक्ता सुधियां हिताय ।
अतः परं दृष्टदशां ब्रवीमि
सर्वत्र दृष्ट्या पदतोऽपि धीराः ॥ १७ ॥
द्रष्टुः परस्माद्यदि खेटयोगः
पूर्वस्य राशेरपि हीनता स्यात् ।
पदक्रमादेवमिह प्रयोज्या
फलानि सौम्यर्क्षवशाद्वदन्ति ॥ १८ ॥
शुभग्रहाणामपि संयुतौ स्यात्
योगस्तदा पापखगैर्विनाशः ।
नीचे तथा भोगिगृहे च मृत्युं
वदन्ति धीरा यवनाः परत्र ॥ १९ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां द्वादशोऽध्यायः ॥

अथो रहस्यं मुनिभिः प्रणीतं
ज्योतिर्विदां सौख्यकरं प्रवक्ष्ये ।
ज्ञात्वा यमार्याः सततं सभासु
कण्ठीरवत्वं क्षणतः प्रयान्ति ॥ २० ॥

लग्नेशितुर्योगदखेचरस्य
भागान् विसंयोज्य पदक्रमेण ।
अजादितो द्वादशधा विभज्य
प्राप्तं हि लग्नं खलु दिव्यलग्नम् ॥ २१ ॥

(व्याख्या) लग्नेश्वरस्यापि च योगदस्य च स्फुटं संयोज्य मेषादिक्रमेण अजादि द्वादशधा विभज्य द्वादशधा गतराशीन् अपास्य मेषादितः नयने यल्लग्नं भवति तदत्र दिव्यलग्नम्। योगदाभावे केवलमादाय द्रष्टव्यम्। योगदकेवलयोरभावे चन्द्रलग्नेश्वरस्फुटवशात् लग्ननिर्णय इति उत्तरश्लोकेन वक्ष्यति ।

योगप्रदो यत्र न तत्र चन्द्रात्
लग्नाधिपाच्चैवमुदाहरन्ति ।
केचित्तु दिव्यादपि योगदाच्च
प्रकल्पयन्त्यत्र तु तन्न युक्तम् ॥ २२ ॥

एवं कृतं लग्नगृहं शुभोच्च-
स्वक्षेत्रगः पश्यति चेन् महीपः ।
स पापराशिर्यदि पापयुक्तः
नीचेन दृष्टोऽपि भवेद्दरिद्रः ॥ २३ ॥

[1]ओजे विलग्ने तु तदेव लग्नं
युग्मे तु तत् सन्मुखमामनन्ति ।
तस्मात् पदं पूर्ववदूह्य पश्चात्
सर्वं नराणां प्रवदेत् सभासु ॥ २४ ॥

लग्नं नराणामिदमेव योज्यं
प्रायः प्रभूणां न च पामराणाम् ।
दशाः च तस्माद्विविधाः च योज्याः
कदापि नो याति मृषापदं सः ॥ २५ ॥

तत्सप्तमस्थानविभोर्विपश्चित्
द्रेक्काणमालोक्य विशिष्टबुद्धिः ।

1. घ. सार्धश्लोकोऽत्र न दृश्यते.

तस्मिन् शुभे स्वोच्चखगेन दृष्टे
वदेत्तदानीमपि राजयोगम् ॥ २६ ॥

नीचेन दृष्टेऽप्यशुभेन युक्ते
भवेद्दरिद्रः कुमतिः कुशीलः ।
मिश्रेण मिश्रं बलनिर्णयेन
बलाबलज्ञाः समुदाहरन्ति ॥ २७ ॥

लग्नेशितुः सप्तमनायकस्य
स्फुटं सुधीः पूर्ववदेव वीक्ष्य ।
प्रकल्प्य लग्नं शुभखेचरेन्द्रैः
दृष्टे शुभं राशिवशाद् वदेत ॥ २८ ॥

द्रेक्काणतस्तस्य हि लोकमाहुः
तदंशतो देवविवेचना स्यात् ।
अयं विशेषोऽत्र दृगाणमेव
प्रकल्प्य लग्नं तत एव भावान् ॥ २९ ॥

विचारयेल्लग्नवदेव धीमान्
फलानि राज्ञां प्रवदेत् सभासु ।
तस्मिन् रवौ स्यात् परमेशलोकः
शुभेन दृष्टेऽप्यशुभेन हीनः ॥ ३० ॥

चन्द्रेण पूर्णेन तदुच्चनाथ-
स्योक्तं फलं भूमिसुतस्य लोकम् ।
पातालमाहुः [1]मनु[विधु]जस्य लोकं
धातुर्गुरोः साम्बशिवस्य लोकम् ॥ ३१ ॥

शुक्रेण गन्धर्वपदं शनौ तु
बुधर्क्षगे विष्णुपदे निवासः ।
केतुस्तु कैवल्यफलप्रदाता
राहोस्तु नित्यं निरयं वदन्ति ॥ ३२ ॥

---

1. च. ङ. क. वणिजस्तु

संक्षेपतः प्रोक्तमिदं नराणां
बलानुगुण्येन वदेद्यथार्थम् ।
योगप्रदो लग्नपतेः यदि स्यात्
केन्द्रत्रिकोणोपचयेषु विद्वान् ॥ ३३ ॥
वदेत्तदानीमपि राजयोगं
विपर्यये स्यान् मनुजो दरिद्रः ।
प्रायः प्रभूणामिदमेव दृश्यं
संवादतो योज्यमिदं [1]विलग्नात् ॥ ३४ ॥
व्यये तृतीयाष्टमनायकश्चेत्
योगप्रदो दुष्टफलप्रदाता ।
[2]अंशाद् दृगाणादपि लग्ननेतुः
सुस्थानसंस्थो यदि योगदाता ॥ ३५ ॥
तथापि शस्यं शुभमेवमेव दशास्तु योज्याः खलु योगनेत्रा ।

॥ गोचरतः फलविचारः ॥

योगप्रदात् गोचरतो यदि स्यात्
रविः शुभैः संयुतिभाक् तदानीम् ।
राज्ञः प्रसादं विपरीतमेव
क्रूरैर्युते नीचगते च नित्यम् ॥ ३६ ॥
चन्द्रो यदा योगदखेचरेण
युतस्तदा सौख्यफलप्रदाता ।
व्रणप्रदाता धरणीसुतः स्यात्
प्रायो बुधः वैदिकसौख्यदाता ॥ ३७ ॥
गुरुर्नृपप्रीतिकरो भृगुस्तु
स्त्रीराजसंमानकरो विशिष्य ।
शनिः मनःक्लेशकरः फणीन्द्रः
दुष्कीर्तिदुर्वृत्तिकरोऽपकारी ॥ ३८ ॥

---

1. च. वदन्ति 2. ङ. अयं श्लोकः न दृश्यते

एवं त्रिकोणेषु च सङ्गमेषु
दशानुगुण्येन वदेत् फलानि ।
ऊह्यं पुनर्दृष्टिवशाच्च तद्वत्
शुभैः शुभाप्तिर्विषमे तदन्यत् ॥ ३९ ॥

योगप्रदः शोभनखेचरैस्तु
व्ययाधिनेत्रा यदि संयुतः स्यात् ।
विवाहयज्ञादिमुखेन काले
वदेत्तदानीं धनहानिमेव ॥ ४० ॥

॥ अथ स्फुटवशात् गोचारनिर्णयः ॥

योगप्रदस्यापि च लग्ननेतुः
स्फुटं सुधीः योज्य दिने दिने च ।
द्विधा विभक्ते खलु यद्विशिष्टं
लग्नं तदानीय ततोऽशकं च ॥ ४१ ॥

प्रकल्पनीयस्फुटयोगलग्ने
रवेर्यदा गोचरतः प्रवेशः ।
नृपाद्धनाप्तिः बलिनोऽन्यथा तु
धनस्य हानिः नृपमूलतः स्यात् ॥ ४२ ॥

तत्रैव चन्द्रो बलवान् यदि स्यात्
द्वीपान्तरात् राजधनागमः स्यात् ।
भौमेन हानिं कलहं व्रणञ्च
दाहं गृहस्यापि वदन्ति सन्तः ॥ ४३ ॥

बुधेन तु ज्ञातिधनं विवादात्
वाणिज्यवेश्यासुखलाभमाहुः ।
गुरौ तु पुत्रादिसुखं विशिष्य
पुण्यप्रसक्तिं भृगुजे तु राज्ञः ॥ ४४ ॥

संमानमत्यन्तधनागमञ्च
शनौ तु रोगं कलहं वदन्ति ।

राहौ भुजङ्गात् भयघातपातं
केतौ तु पुण्यस्थलतीर्थवासम् ॥ ४५ ॥
एवं दशायामधिपस्य लग्न-
नाथस्य योज्यस्फुटराशिभागान् ।
दैवज्ञचूडामणिरेवमेव
दशाविभागे च फलं ब्रवीति ॥ ४६ ॥
गुरोः स्फुटं योगपतेः स्फुटेन
संयोज्य लब्धर्क्षवशात् सुतर्क्षे ।
गुरुप्रवेशो यदि गोचरे स्यात्
तदा वदेत् पुत्रजनिं नरस्य ॥ ४७ ॥
एवं हि शुक्रे तु विवाहमाहुः
कुजे भवेत् भ्रातृजनिर्बुधे तु ।
ज्ञातिप्रशस्तिः बलतः शुभानि
विपर्यये हानिकरा भवन्ति ॥ ४८ ॥
रन्ध्रेशलग्नाधिपयोः स्फुटेन
त्रिकोणराशौ यदि लब्धतः स्यात् ।
शनिर्भुजङ्गो यदि वा तदा स्यात्
मृत्युर्दशास्वेवमवेक्षणीयः ॥ ४९ ॥
नीचो भवेन्नैच्यकरो नरस्य
पापस्तथा [1]भङ्गकरो हि नित्यम् ।
कुर्युस्तथोच्चो बहुमानमेवं
योज्यं हि सर्वत्र विचक्षणेन ॥ ५० ॥
क्रूरांशकः क्रूरयुतो यदि स्यात्
तदा भवेद्राजभयेन भङ्गः ।
युतिर्भुजङ्गेन तु दुष्टकर्मा
कारागृहप्राप्तिमुपैति सद्यः ॥ ५१ ॥

---

1. च. भाग्यहरो

अयं योगः जननकालेऽपि द्रष्टव्यः ।

वक्तव्यमत्रास्ति बहुप्रजानां
विचिन्त्य धीरः प्रवदेत् सभासु ।
रहस्यमध्यायममुं प्रयत्नात्
कदापि नो याति मृषापदं सः ॥ ५२ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां त्रयोदशोऽध्यायः ॥

खेटाभिधां मध्यदशां प्रवक्ष्ये
ज्योतिर्विदां सौख्यकरीं नरस्य ।
बलाधिको यः खगमस्तदादि
बलाबलं राशिवशान् नराणाम् ॥ १ ॥

चन्द्रोऽधिकश्चेत् तत एव नेयम् ।
ह्यात्माधिकश्चेदपि तत्तदादि ॥ २ ॥

बलिनो ह्यात्मनो वा
बलिनो ब्रह्मणोऽथवा नेया ।
स्थिरसंज्ञराशिभेदात्
क्रमतो नेया ह्यथवाक्रमतः ॥ ३ ॥

पश्चाद् ग्रहो यदि बली स हि कारकोऽत्र
तस्माद्दशामपि नयेत् बलिनोऽपि नित्यम् ।
धाता क्रमेण बलवान् यदि खेटतोऽपि
तस्माद्व्ययस्थितिखगान्तमियं दशा स्यात् ॥ ४ ॥

राशीश्वरो यदि बलादुभयोर्बली चेत्
तस्मात्तदन्तमिति संकथयन्ति तज्ज्ञाः ।
द्वित्रादिखेचरविधौ बलवद्ग्रहात् स्या-
दित्येवमाहुरखिलाः मुनयो धरिव्याम् ॥ ५ ॥

ओजे विलग्नभवने तु तदादि नेया
युग्मे तु सन्मुखवशात् परिकल्पनीया ।

अन्तर्दशात्र नवधा परिकल्पनीया
द्रेक्काणमार्गमनुसृत्य परे वदन्ति ॥ ६ ॥

सौम्यैस्त्रिकोणनिलयैरशुभैः परत्र
चेत् संस्थितैः शुभफलं नियतं वदेत ।
नीचे स्थिते यदि तदा नियमेन नैच्यं
सन्तो वदन्ति शुभदृष्टिविवर्जिते तु ॥ ७ ॥

अत्रायमेष्यति विशेषगुणो नराणां
चन्द्रार्कजौ यदि दशाभवने तदानीम् ।
वाताद्भयं यदि बुधो निजविद्ययैव
तत्कालजीवनमिति प्रवदन्ति सन्तः ॥

पापो भुजङ्गमयुतो यदि तत्र भौमः
शस्त्राग्निभिर्मरणमेति दशाविपाके ॥ ८ ॥

चन्द्रः क्षितिजेन युतः क्रूरयुतो वाथ नीचसंदृष्टः ।
व्रणसन्निपातदोषं कुरुतेऽवश्यं दशाच्छिद्रे ॥ ९ ॥

सूर्यः क्षितिजादिखगैः युक्तो यदि वीक्षितो दशाराशौ ।
राज्ञो मुद्राभङ्गं कुरुतेऽवश्यं ह्यसंशयं लोके ॥ १० ॥

एवं ग्रहसंयोगे द्रष्टव्यं सर्वदा शुभमशुभं वा ।
भुजङ्गमो दशायां चेत् व्यये सर्वस्वहानिदः ॥ ११ ॥

चन्द्रेण युतो दृष्टः कुर्यात् प्राणान्तिकं दुःखम् ।
क्षितिजेन युतो दृष्टः कुर्याच् चोराग्निभिः नाशम् ॥ १२ ॥

रविणा राज्ञा नाशं बुधेन विवादाच्च बन्धुमुखात् ।
गुरुणा ब्राह्मणमूलात् पुत्रमुखाद्वापि निर्दिशेन्मतिमान् ॥ १३ ॥

शुक्रेण स्त्रीमूलात् राजमुखाद्वा विनिर्दिशेत् नाशम् ।
शनिना प्रेष्यमुखाद्वा भूमूलाद्वा विनाशः स्यात् ॥ १४ ॥

केतौ क्षीणगृहालयदेवागारादिनिर्माणात् ।
द्वित्रादिखेचरयुते भुजङ्गमे तन्मुखेन नाशः स्यात् ॥ १५ ॥

राहौ नीचे तद्वत्ग्रहदृष्टे निधिवशात् वदेन्नाशम् ।
एवं लाभस्थाने स्थितैर्ग्रहैः लाभ एव निर्देश्यः ॥ १६ ॥
एवं विलग्नपतिना द्रेक्काणाद्योगदाद्विनिर्देश्यः ॥

दशाधिनाथो यदि नाशपेन युतस्तदा द्रव्यविनाशकारी ।
धनाधिनाथेन युतो दशेशः धनस्य लाभं सततं करोति ॥ १७ ॥

कर्ता यदि स्यात् खगमो हयेन भावाधिनाथेन युतस्तदा स्यात् ।
एवं तदन्यत्र विचारणीयं योगप्रदाञ्चैवमुशन्ति तज्ज्ञाः ॥ १८ ॥

दशाराशीश्वराद्रन्ध्रनाथो वा धनमाश्रितः ।
तदा ऋणेन सततं बाधितः क्लेशवान् नरः ॥ १९ ॥

अन्तर्दशायामेवं हि योजनीयं विदुर्बुधाः ।
इयं दशा हि प्रबला नराणां च शुभाशुभे ॥ २० ॥

गोचरैः खगमैरेवं निर्दिश्य च बलाबलम् ।
दशारम्भे दशामोक्षे राशिं ज्ञात्वा फलं वदेत् ॥ २१ ॥

दशाविमोक्षे राशौ तु—यदि राहुः स्यात्तदापि हानिः स्यात् ।
जननादि वत्सराणां संख्यां कृत्वा चरादिमार्गेण ॥ २२ ॥
प्रतिराशि प्रतिवत्सरमिति गणयेत्सर्वदा नरो मतिमान् ।
एवं गणने यस्मिन् दशावसानं भवति राशौ हि ॥ २३ ॥
तद्राशिवशाद्योज्यं फलं च सद्यः सदाचारैः ।
राशौ च दशारम्भे शुभे शुभं स्याद्विपर्यये त्वशुभम् ॥ २४ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां चतुर्दशोऽध्यायः ॥

विलग्नभवनं बलं यदि तदापि नेया दशा
ततोऽपि बलवत्तरं यदपि सन्मुखं तत्ततः ।
दशानयनमिष्यते बलतदन्यमिश्रात्मनां
क्रमेण च [1]सुधीवरैरिति च सत्यमौनीरितम् ॥ १ ॥

1. ङ. सुधीर्बलैः

दशाप्रविष्टखगमस्थितबलराशीश्वरात् दशा नेया ।
प्रकारक्रमतः खलु सर्वत्रास्यां दशायां हि ॥ २ ॥
[1]धर्मेशात्खेटानां राशीनां तत्पवित्रराशिवशात् ।
अन्तर्दशाविशेषान् कथयामि सुविहितं समुद्दिश्य ॥ ३ ॥
सततं नवधा भङ्क्त्वा राशेः प्रथमं ततस्तदंशस्य ।
एवं सर्वत्रोह्यं पश्चादप्येवमेव स्यात् ॥ ४ ॥

फलानि शुभखेचरेक्षणवशाच्छुभं सर्वदा
कदाप्यशुभखेचरेक्षणवशादरिष्टं फलम् ।
शुभाशुभपरीक्षणे तदपि [2]भावभेदाद्वदे-
दितीव मुनयोऽवदन्नखिलशास्त्रपारं गताः ॥ ५ ॥
क्रूरश्शुभर्क्षाधिपतिः शुभः स्यात्
सौम्योऽपि पापोऽशुभभावनाथः ।
एवं हि विज्ञाय सुधीः नराणां
शुभाशुभत्वं प्रवदेत् फलानाम् ॥ ६ ॥

विलग्नवद्दशाराशे(शि)रपि योज्यस्सदा बुधैः ।
दुर्भावाधिपयुक्तश्चेत् क्रूरः सौम्योऽत्र सर्वदा ॥ ७ ॥
क्रूरोऽपि शुभभावानामधिपेन युतः शुभः ।
नीचो भुजङ्गमयुतो नीचखेटयुतोऽपि च ॥ ८ ॥
सर्वदा क्रूर एवात्र दशायामिति निर्णयः ।
फलं भावपरिज्ञानात् सर्वथात्र प्रशस्यते ॥ ९ ॥

॥ अथान्या दशा ॥

मेषादि वास्य ग्रहतो दशा स्यात्
तुलादि वा पृष्ठखगाधिपात् स्यात् ।
बलप्रकारो बहुवर्षहेतुः
शुभाशुभं खेटवशाद्वदन्ति ॥ १० ॥

---

1. च. नवमे
2. वा दशेशात्

[1]सौम्येक्षिते वान्त्यगृहे त्रिकोणे
[2]शुभेक्षिते वा शुभमाहुरार्याः ।
[3]नीचेक्षिते वान्त्यगृहे शुभैर्वा
विदेशयात्रां प्रवदन्ति धीराः ॥ ११ ॥

अन्तर्दशा राशिवशाद्विभक्ता
कर्ता तु पश्चाद्ग्रह एव राशेः ।
पदं च पश्चाद्ग्रहतः प्रकल्प्यं
दृगाणभं राशिवशाद्वदन्ति ॥ १२ ॥

एतद्दृगाणे यदि नीचखेटः
तदा नरः स्यान्नरकाय नूनम् ।
एवं शुभैः स्वर्गपदं व्रजन्ति
केतोस्तु कैवल्यपदं सदा हि ॥ १३ ॥

यद्देवताको यः खेटःतत्तल्लोकं विनिर्दिशेत् ।
यस्यां दशायां मरणं पूर्वं तल्लोकसंश्रयः ॥ १४ ॥

ततस्तदस्तभवनग्रहलोकं विनिर्दिशेत् ।
ततो द्वितीयभवनग्रहलोकमनन्तरम् ॥ १५ ॥

एवमेवं नयेद्विद्वान् उपर्यपि विचार्य तु ।
राहुर्यस्मिन् गृहे तत्र जन्मारम्भं विनिर्दिशेत् ॥ १६ ॥

केतोः समाप्तिश्चेत् पूर्वं कैवल्यं सर्वदा भवेत् ।
यस्मिन् राशौ शुभाः खेटाः तस्मिन् लोकेऽधिकं शुभम् ॥ १७ ॥

यस्मिन् राशौ तथा नीचाः तत्र स्यान्निरयो ध्रुवम् ।
मिश्रे मानुषजन्मा स्यात् इति सर्वज्ञभाषितम् ॥ १८ ॥

तस्मात् त्रिकोणभे मन्दे संन्यासाप्तिं विनिर्दिशेत् ।
पञ्चमाधीश्वरयुतस्त्वातुरन्यासदायकः ॥ १९ ॥

---

1. च. म्यस्थिते
2. च. भस्थिते
3. च. चस्थिते

गुरुणा वा युतो दृष्टः क्रमसंन्यासवान् भवेत् ।
भुजङ्गमयुतो दृष्टः पाषण्डो भवति ध्रुवम् ॥ २० ॥

नीचचन्द्रभुजङ्गाभ्यां दृष्टो यदि दिगम्बरः ।
कुजचन्द्रयुतो दृष्टः कौलभाक् तु भवेन् नरः ॥ २१ ॥

अवधूतो भवेत् केतोः शनियोगे न संशयः ।
एवमस्माद् द्रगाणाच्च प्रसिद्धाच्च द्रगाणभात् ॥ २२ ॥

विचार्य मतिमान् सम्यक् फलं ब्रूयाद्विचक्षणः ।
स्त्रीणां मीनादितो नेया बलतः कन्ययाऽथवा ॥ २३ ॥

व्युत्क्रमात्पृष्ठखेटान्तं दशासंवत्सरान् विदुः ।
द्रगाणांशककूलप्तिस्तु पुंवदेवात्र योजयेत् ॥ २४ ॥

व्युत्क्रमात् परलोकं च व्युत्क्रमेणैव योजयेत् ।
द्रगाणकोणभे मन्दे रोगिणी वा तपस्विनी ॥ २५ ॥

नीचैः नीचव्रता सोच्चैः शुभव्रतपरायणा ।
क्रूरैः क्रूरव्रतपरा पतिनिन्दापरायणा ॥ २६ ॥

भुजङ्गमेन सततं कुलटावृत्तिमाश्रिता ।
नीचदृष्टौ जटाधारिण्यथवा चौर्यकर्मकृत् ॥ २७ ॥

कुजे चन्द्रयुते दृष्टे मद्यपानरता भवेत् ।
नीचे चन्द्रे कृशा दीना पूर्णलक्षणसंयुता ॥ २८ ॥

रवौ राजगृहावासेत्येवं सर्वत्र योजयेत् ।
द्वादशांशविभेदेन स्त्रीणां ब्रूयात् फलाफलम् ॥ २९ ॥

नवांशभेदतः पुंसां पदतो वापि योजयेत् ।
इयं हि संवादवशात् प्रबला हि सदा नृणाम् ।
अत्रास्ति बहु वक्तव्यं तमूहित्वा वदेत् बुधः ॥ ३० ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगतसमस्त-
विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-
मालायां पञ्चदशोऽध्यायः ॥

॥ अथ निसर्गदशा ॥

भागांस्तथा भागविदः कलाश्च
विशिष्टसंख्यामभितो वियोज्य ।
मासान् स्थितान् मासवशादशेषं
निर्णीय विद्वान् प्रवदेत् सभासु ॥ १ ॥

अयं विशेषोऽत्र सुरद्विषस्तु
शनैश्चरे योगमुदाहरन्ति ।
केतोश्च भौमेन तु संयुतिः स्याद्
अतो निसर्गाभिधया प्रशस्ता ॥ २ ॥

एवंविधां खेटदशां निसर्गां
विभज्य भागक्रमतो हि विद्वान् ।
शुभैः शुभं पापखगैश्च दुःखं
मिश्रे च मिश्रं प्रवदेदतन्द्री ॥ ३ ॥

भावा दशाः राशिवशात् प्रकल्प्याः
सर्वत्र सद्भिः किल शास्त्ररीत्या ।
यत्रोच्यते तत्र पदप्रकल्पिः
दशाधिनेतात्र तु कारकः स्यात् ॥ ४ ॥

एनां दशां दिव्यविलग्नतोऽपि
नयेदतन्द्री त्वितराच्च लग्नात् ।
राशीश्वरात् खेटपतेः विलग्नात्
तथा त्रिधा खेटदशाविभागः ॥ ५ ॥

ततश्च तां खेटगतेर्विभक्तां
सूर्यक्रमाद् भुक्तिरिति प्रसिद्धिः ।
केचित्तु युग्मोजवशाद्वदन्ति
पदक्रमेणेति परे वदन्ति ॥ ६ ॥

यथामति प्रेक्ष्य वदेत् सभायां
बलाबलाद्वाप्युपदेशतो वा ॥ ६१ ॥

इन्दुनेत्रनवविंशतिक्रमात्
धृतिःकृतिः पञ्चाशत्क्रमतो नृणाम् ।
चन्द्रारेन्दुजशुक्रसुराणां
रविमन्दानां किल संख्याः स्युः ॥ ७½ ॥

एवं त्रिधा तामपि योजयित्वा
दशां ततो द्वादशधा वियोज्य ।
अथो विलग्नादथवाधिनेतुः
भृगोर्दशामस्य दशां तदीशात् ॥ ८½ ॥

चन्द्राद्रवेरंशुमतोऽर्कसूनोः
तद्राशिकोणे मरणं पतङ्गे ।
अथैतदंशक्रमतो विपश्चित्
कुजांशरीत्या क्रमतो वियोज्य ॥ ९½ ॥

[1]लग्नत्रिकोणे चरभाद् बलाढ्यां
नयेदिति ह्यन्तरखेटयोगः ।
चन्द्रो यदि स्याद्बलवान् तदादि
खेटोऽथवा चेत् बलवान् ततः स्यात् ॥ १०½ ॥

बलाबलं योज्य सुधीः सभायां
फलं च नित्यं खलु योजनीयम् ।
भावास्तु खेटक्रमतोऽत्र योज्याः
कर्ता लवेशः परिकल्पनीयः ॥ ११½ ॥

लवेश्वरे क्रूरखगे दरिद्रः
शुभे धनाढ्यः शुभखेटयुक्ते ।
राजा तथा स्वोच्चगते च तद्वत्
ग्रहैश्च दृष्टेऽपि धनाधिनाथः ॥१२½ ॥

नीचेन मन्देन फणीश्वरेण
दृष्टस्तथा स्यान्मरणाय बाल्ये ॥ १३ ॥

---

1. ब. बल

तस्मिन् शुभयुते दृष्टे पूर्णमायुर्विनिर्दिशेत् ।
शुभपापग्रहैः दृष्टे मध्यमायुर्विनिर्दिशेत् ॥ १४ ॥

नीचैर्वा पापखेटैर्वा दृष्टे स्वल्पं विनिर्दिशेत् ।
तत्रापि क्रूरखेटांशछिद्रकोणे मृतिं वदेत् ॥ १५ ॥

तत्रापि तत्त्रिकोणस्थे नीचचन्द्रे मृतिं वदेत् ।
लवकेन्द्रे तु बलवत् लग्नं मृतिकरं विदुः ॥ १६ ॥

तत्रापि लग्नास्तमये बलाबलविचिन्तनम् ।
शुभानामेवमेव स्यात् प्रणाडी कालचिन्तने ॥ १७ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां षोडशोऽध्यायः ॥

सम्पद्दशां सम्प्रति शास्त्ररीत्या
वक्ष्ये बुधानां हितकारणाय ।
लग्नास्तनाथस्फुटयोगलग्नात्
तदीश्वराद्वोडुदशा क्रमेण ॥ १ ॥

समाः प्रकल्प्याः रविवद्विलग्न-
नाथस्य तत्खेटवशाच्च सर्वे ।
एवं कृता सा नवधा विभज्या
दशा तदीशात्तु फलाफलानि ॥ २ ॥

एवं च चन्द्रो यदि लग्ननाथ-
युतस्तथा क्रूरयुतोऽथ दृष्टः ।
दरिद्रयोगः शुभखेचरैस्तु
[1]तद्राजयोगं मुनयो वदन्ति ॥ ३ ॥

रव्यादितोऽत्र ग्रहशीलयोगम्
विचिन्त्यमाहुर्गुणनिर्णयश्च ।
आदित्यचन्द्रौ नृपती तनूजः
क्षितेस्तु नेता तनयो बुधः स्यात् ॥ ४ ॥

---

1. च. ग. क. स्याद्राजयोगो मुनिभिः प्रणीतः

शुक्रस्सुरेड्यः सचिवौ शनिस्तु
प्रेष्यो भुजङ्गस्तु स पाददासः ।
केन्द्राश्रितैरेवमवेक्षणीयम्
खेटैश्शुभैरप्यशुभैरथ स्यात् ॥ ५ ॥

निसर्गनक्षत्रजतद्भिदादि
विचार्य वक्तव्यमतन्द्रितेन ।
चन्द्रांशमारभ्य दशां च विद्वान्
अधीशचन्द्रान्तमवेक्ष्य विद्वान्[1] ॥ ६ ॥

तत्केन्द्रपानामपि तद्वदेव
नीत्वा फलानि प्रवदेदतन्द्री ।
[2]अथो फलाख्यां च दशां प्रवक्ष्ये
बलाबलात् खेटविलग्ननेत्रोः ॥ ७ ॥

खेटो बली चेत्तत एव नेया
बलाधिका लग्नपतेरथापि ।
ततस्तदीशो यदि ततदादि
क्रमेण नेया हि दशा सदापि ॥ ८ ॥

शुभाशुभान्याश्रयखेचरेण
प्रविष्टखेटेन च वा बलेन ।
काले विपश्चित् सततं सभायां
वदेदसाधारणतो विशिष्य ॥ ९ ॥

एतत्प्रकारेण हि लग्नतः स्यात्
प्रकारभेदेन दशाप्रकल्पितिः ।
खेटस्य केन्द्रस्थितखेचरोऽत्र
फलप्रदः स्यादिति शास्त्ररीतिः ॥ १० ॥

द्वित्रादिखेटैरशुभैश्शुभैर्वा
युते बलाभ्युन्नतखेचराद्वा ।

---

1. ङ. ग. पश्चात् 2. ङ. अथोपलाख्यां

न चेत् सुधीः भागगतात् खगेन्द्रात्
आलोच्य सर्वं प्रवदेत् सभासु ॥ ११ ॥

अन्तर्दशाप्रकारस्तु द्रेक्काणक्रमतो भवेत् ।
सा चांशक्रमतो नेया क्रमव्युत्क्रमभेदतः ॥ १२ ॥

सा च द्वादशधा योज्या सुधियां फलसिद्धये ।
तं सूक्ष्मफलसिद्ध्यर्थं त्रिंशद्धा तु वियोजयेत् ॥ १३ ॥

कारकोऽन्तर्दशायास्तु लवतो राशितः क्रमात् ।
आलोच्य सर्वं मतिमान् कदाचिन्न मृषा भवेत् ॥ १४ ॥

एनां दशां भाग्यवशाद्विपश्चित्
नयेदतन्द्री फलसिद्धिहेतोः ।
दशाक्रमं चात्र विदुर्मुनीन्द्राः
क्रमेण केन्द्रक्रमतश्च षष्ठात् ॥ १५ ॥

चरस्थिरद्वन्द्वगतेन चान्यत्
पूर्वोक्तरीत्या प्रवदन्ति सन्तः ।
दशाधिपस्याप्यथवा दशायाः
व्यये यदा [1]शुक्रभुजङ्गयोगः ॥ १६ ॥

खेटक्रमाद्वाप्यथवा स्फुटाद्वा
सर्वस्वहानिं प्रवेदत् तदानीम् ।
यदा युतो नीचखगैर्भुजङ्गः
वदेत् तदानीं बहुकष्टमेति ॥ १७ ॥

नीचेन सूर्येण युतो यदि स्यात्
वदेत्तदानीं [2]नृपदण्डमेति ।
चन्द्रेण नीचेन युतो यदि स्यात्
वदेत् तदा स्त्रीवधजापवादम् ॥ १८ ॥

तथाविधेनेन्द्रपुरोहितेन
युतो द्विजघ्नापयशोविनाशः ।

1. च. शुद्धभुजङ्ग 2. क. बहुद

शनौ तु नीचे भुजगेन युक्ते
चौर्यापवादेन भवेद्विनाशः ॥ १९ ॥

कुजेन नीचेन युते भुजङ्गे
स्यात् सोदरीसङ्गमजापवादः[1] ।
रवौ भुजङ्गेन युते तथोच्चे
द्रव्यादिनाशो न च[2] राजदण्डः ॥ २० ॥

चन्द्रे तथोच्चे कुलभामिनीनां
हृतिं वदेत् स्वस्य परस्य वापि ।
एवं खगानामपि चोच्चगानां
विचार्य सर्वं प्रवदेदवश्यम् ॥ २१ ॥

दशात्यये शोभनखेचरस्या-
प्याहुः मुनीन्द्राः विपदां बहुत्वम् ।
व्यये भुजङ्गेन्दुदिवाकराणां
युतौ तथा भुक्तिपदेन योज्यम् ॥ २२ ॥

राहूदये राहुदशाप्रसक्तौ
व्यये भुजङ्गेन्दुदिवाकरेषु ।
असौख्यजातं सकलं च विद्यात्
प्राणात्ययं वाङ्गविनाशनं वा ॥ २३ ॥

खेटाद्दशाया यदि चन्द्रशुक्रौ
धने तदानीं निधिलाभमाहुः ।
कुजो द्विजानामथ देवतानां
धनापहारेण भवेद्धनाप्तिः[3] ॥ २४ ॥

बुधेन वेश्याविदुषां धनाप्तिः
गुरौ शुभे न्यायपदाद्धनाप्तिः ।

---

1. च. ज: प्र 2. च. नाशेन च
3. च ङ. क. वदेद्धनाप्तिम्

तथाशुभे ब्रह्मधनापहारः
मन्दे तु राष्ट्रापहृतं धनं स्यात् ॥ २५ ॥
राहौ तदाज्ञासमुपार्जितं स्यात
एवं धनार्तिं प्रवदेद् दशायाम् ।
शुभैस्तु सम्पादितवित्तवृद्धिः
पापैस्तथान्त्ये व्ययमेति वित्तम् ॥ २६ ॥
नीचैस्तदन्यायपदेन नाशं
एवं हि सर्वत्र च योजनीयम् ।
यस्यां दशायां[1]धनगः फणीन्द्रः
शुक्रेण [2]युक्तो रविणा च दृष्टः ॥ २७ ॥
तस्यां दशायां नयनस्य हानिं
कुटुम्बहानिं च वदेदवश्यम् ।
शुभेन दृष्टे च शुभैर्युते वा
रोगाद्भयं नीचखगैस्तु राज्ञा ॥ २८ ॥
तथाष्टमस्थैरपि पापखेटैः
नेत्रद्वयस्यापि वदन्ति हानिम् ।
एकत्र चेदेकविलोचनस्य
हानिं द्वये नेत्रयुगस्य हानिम् ॥ २९ ॥
एवं विलग्नादपि लग्ननाथात्
द्रगाणतश्चापि विचिन्तनीयम् ।
भुजाधिनेता यदि नेत्रपेन
युक्तस्तथा क्रूरखगैर्युतश्च ॥ ३० ॥
वदेत्तदानीं स्वभुजेन नेत्र-
हानिं विपश्चित् प्रयतः सभायां ।
नेत्राधिपः शुक्रधने यदि स्यात
द्रेक्काणभे शस्त्रभवं विनाशम् ॥ ३१ ॥

1. ङ. धनगौ फणीन्द्र 2. ङ. युक्तौ

रवेः द्रगाणे यदि नेत्रनाथः
क्रूरैर्युतो राजभयाद्विनाशः ।
नेत्रेश्वरे दण्डधरे द्रगाणे
एवं युतः क्रूरखगैस्तदानीम् ॥ ३२ ॥

काष्ठादिभिर्नाशमुपैति नेत्रं
ओजोंशके त्वेकमुदाहरन्ति ।
युग्मे तु नेत्रद्वितयस्य हानिं
मेषांशके मेषपदप्रहारात् ॥ ३३ ॥

शीर्षोदयांशेषु च शीर्षतः स्यात्
पृष्ठोदयांशेषु च पादघातात् ।
एवं विलग्नेशदशेश्वराणाम्
आलोच्य युक्त्या प्रवदेन् मनुष्यः ॥ ३४ ॥

द्रगाणतो जातकवद्विचार्य
पदाच्च केचित् समुदाहरन्ति ।
रोगाधिपेनापि युतौ तु नेत्र-
रोगं वदेत् शोभनदृष्टिहीने ॥ ३५ ॥

योगप्रदादेवमवेक्ष्य सर्वं
संवादतो निश्चयमेति विद्वान् ।
षड्राशयो लग्नभतो हि संख्याः
त्वन्ये तु लोके विपरीतभावाः ॥ ३६ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-
विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-
मालायां सप्तदशोऽध्यायः ॥

॥ श्रीः ॥

JYOTIṢA PHALARATNAMĀLĀ

OF

KṚṢṆA MIŚRA

Edited by
Sri A. A. RAMANATHAN, M. A., L. T.,
and
Sri T. H. VISWANATHAN.

कृष्णमिश्रविरचिता

॥ ज्योतिषफलरत्नमाला ॥

(*from page 67 of Volume XVI No. ii*

॥ अथ अष्टादशोऽध्यायः ॥

सर्वे भावाः श्रीदशामार्गरीत्या योज्याः सद्भिर्मातृपुत्रादयोऽपि ।
आयुर्योगे रन्ध्रपः षष्ठपो वा मृत्युं दद्याद्युक्तभे केवले न ॥ १ ॥

वर्षप्राप्तिः लग्नतः सप्तमेश-
भागैर्युक्ता मध्यतोऽर्धं विभक्ताः ।
लब्धा भागाः वर्षसंख्याः कलास्तु
मासाः ज्ञेया वैकलाः स्युर्दिनानि ॥ २ ॥

एवं नीता लग्नतस्तद्दशा स्यात्
ओजो नो चेत् सन्मुखादेव योज्या ।
भुक्तिः खेटांशक्रमेणैव योज्या
द्रेक्काणाद्वा चिन्तनीयं विशिष्य ॥ ३ ॥

द्रेक्काणराशौ यदि पापयोगः
राशीश्वरस्याप्यथवा युतिः स्यात् ।
अर्थस्य हानिं मरणं विदेश-
सञ्चारमाहुः सकला मुनीन्द्राः ॥ ४ ॥

भावास्तमारभ्य विचारणीया
राशेर्द्रगाणं परिकल्प्य लग्नम् ।
द्रेक्काणभागात् स्फुटयोगकूलतात्
आरभ्य नीते पदमे भुजङ्गे ॥ ५ ॥

केमद्रुमः स्यान्मुनिभिः प्रणीतः
दृष्ट्या विहीने शुभखेचरस्य ।
एवं दशायामपि योजनीयं
पदं शुभानामपि योगतः स्यात् ॥ ६ ॥

शुभं तथा पापखगेश्वराणां
युतौ भवेद्व्याधिनिपीडिताङ्गः ।
सूर्येण रोगं शिरसो वदन्ति
तत्र स्थिते पीनसमाहुरिन्दौ ॥ ७ ॥

कुजेऽपि दाहव्रणजं भयं स्यात्
बुधे तु खर्वाटशिरा नरः स्यात् ।
गुरौ तु मूर्छा शिरसो भ्रमः स्यात्
शुक्रे वदेन् नेत्रभवं च रोगम् ॥ ८ ॥

शनिस्तु कीटव्रणकृत् भुजङ्गे
शस्त्रव्रणाज्जातभयं वदन्ति ।
एवं ततो भावविचारणा स्यात्
लोके नराणां हि विलग्नवद्धि ॥ ९ ॥

एतस्य भार्यातनुजौ[पौ]विनाशं
गतौ तदानीं यतियोगमाहुः ।
तयोर्युतौ दुष्टभुजङ्गमेन
लाटो भवेन्नित्यदिगम्बरः च ॥ १० ॥

तस्य द्वितीयाधिपतिर्व्यये चे-
दृणाद्भयं तं न कदा जहाति ।

चतुर्थपः पञ्चमपेन वापि
भाग्याधिनेत्रापि युतो यदि स्यात् ॥ ११ ॥
तदा तु पित्रोस्समकालमेव
मृतिर्भवेदित्यवदन् मुनीन्द्राः ।
ततो हि यद्भावपतिर्विनष्टः
तद्भावहानिं प्रवदेन् नितान्तम् ॥ १२ ॥
यद्भावनाथो बलवान् शुभो वा
तदा स वै तत्फलमातनोति ।
यद्यत्फलं यद्दशतः समुक्तं
तत्तद्दशाकाल उपैति सर्वम् ॥ १३ ॥
चतुर्थपर्क्षादिदशा हि नेया
मातुस्तदालोकनभे मृतिः स्यात् ।
[1]आहुः कलत्रस्य तदीश्वरर्क्षात्
एवं हि सर्वत्र च योजनीयम् ॥ १४ ॥
वर्षसंख्यां चरदशामार्गेणैव नियोजयेत् ।
अन्तर्दशा[2]विवेकस्तु स्यात् खेटक्रमतोऽत्र हि ॥ १५ ॥
नक्षत्रनिर्णयो भावपतिनक्षत्रकोणभे ।
मासस्तदीशद्रेक्काणत्रिकोणे सर्वदा भवेत् ॥ १६ ॥
एवमालोच्य मतिमान् वदेत् सर्वमतन्द्रितः ।
अनुक्तमपि यत्किञ्चत् ऊह्यं बुद्ध्या बलात् सुधीः ॥ १७ ॥
इदमेव विशिष्टं हि शास्त्रेऽस्मिन् लग्नमुच्यते ।
अस्य वांशाद्देवतानां निर्णयं मतिमान् वदेत् ।
द्रेक्काणतः परं लोकमिति सर्वज्ञभाषितम् ॥ १८ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायामष्टादशोऽध्यायः ॥

---

1. च. क. तदंशमारभ्य दशाभृतिश्च तदंशपालोकेनभे सुतस्य ॥
2. च. विभेद ङ. विपाक

त्रिकोणदशा

अथ त्रिकोणाभिधया दशया दैववित्तमः ।
बलाबलं नरेन्द्राणां वदेन्नित्यमतन्द्रितः ॥ १ ॥

सा च त्रिधा लग्नतः तद्द्रेक्काणादिविभेदतः ।
लग्नत्रिकोणतो नेया बलिनश्चन्द्रशुक्रयोः ॥ २ ॥

ततस्तत्पञ्चमान्नेया तत्परं तत्त्रिकोणतः ।
ततः त्रिकोणभवनं द्वितीयात् प्रथमं नयेत् ॥ ३ ॥

तत्त्रिकोणद्वितीयस्य द्वितीयं तु नयेत्सुधीः ।
एवमेवं नयेद् विद्वान् उपर्यपि विचार्य तु ।
ज्ञात्वा राशिं कारकञ्च भोगञ्च फलमीरयेत् ॥ ४ ॥

विशेषमाहुर्मुनयोऽत्र लग्ना-
द्युग्मात्तु राशिप्रतिकल्पनेषु ।
[1]ओजं तु लग्नं परिकल्प्य तस्मात्
त्रिकोणकूलप्तिः खलु शास्त्ररीत्या ॥ ५ ॥

त्रिकोणभे राहुयुते तदादि
स्याद् दुर्बले वा शशिसंयुते वा ।
उच्चग्रहे दुर्बलभे तदानीं
नीचे बले वा विपरीतमेव ॥ ६ ॥

राशिबलादपि खेटबलाद्वा निश्चित्य सुधीः सर्वं प्रवदेत् ।
राशौ तुङ्गखगे वा तुङ्गे वा यदि तुङ्गयुते वा ।
बलशुभचन्द्रे मतिमान् सर्वं शुभमेव वदेच्च तदा ॥ ७ ॥

राहुयोगो मनुष्याणां सर्वदैश्वर्यहानिदः ।
शुभयोगो विशेषेण योगायैव न संशयः ॥ ८ ॥

चन्द्रो राशौ तथैव स्यात् विपरीतफलप्रदः ।
चन्द्रदृष्टिर्विशेषेण धनधान्यविवृद्धिदा ॥ ९ ॥

---

1. च. ओजात्तु

तथैव राहुदृष्टिस्तु धनधान्यापहारिणी ।
एकैकराशेरेकैकः पर्यायः क्रमतो भवेत् ॥ १० ॥
पर्यायाब्दा द्वादश स्युरिति सर्वज्ञसम्मतम् ।
अस्यां दशायां प्राणी स्यात् प्रथमस्य ततस्ततः ॥ ११ ॥
तत्केन्द्रादिक्रमेणैव कारकस्य विनिश्चयः ।
इमामेव द्रगाणादित्रिकोणाच्च दशां नयेत् ॥ १२ ॥
तत्राप्येवं विशेषः स्यात् तद्दशाक्रमतो नयेत् ।
पाकभोगप्रकारं च क्रमेणानेन योजयेत् ॥ १३ ॥
दशाराशिविभागश्च चरमार्गेण योजयेत् ।
भुक्तभोग्यक्रमेणात्र नवांशकविधिर्मता ॥ १४ ॥
तदीश्वरत्रिकोणाच्च प्लुतिभेदाद् दशां नयेत् ।
प्लुतिक्रमे क्रमेण स्यात् व्युत्क्रमेण तथा भवेत् ॥ १५ ॥
फलानि दृष्टिभेदेन खेटभेदादुदीरयेत् ।
पदभेदान् मृतिं ब्रूयात् संवादाद् दैववित्तमः ॥ १६ ॥
भेदभेदान्नवांशस्य विधिरत्र प्रकीर्तिता ।
इमामंशदशां धीमान् नयेत् तत्स्त्रीपुंसयोः सुधीः ॥ १७ ॥
राशिभेदात् प्राणिभेदात् दृष्टिभेदात् फलं वदेत् ।
चन्द्रश्चेच्चन्द्रतो नेया राशिश्चेत् राशितो नयेत् ।
एवं सुधीर्गोचरखेचरैश्च सदा समालोच्य वदेन् नितान्तम् ॥ १८ ॥

॥ अथ प्रकारान्तरेण त्रिकोणदशानयनम् ॥

चरक्रमेण स्थिरभेषु षष्ठ-
क्रमेण केन्द्रादि च युग्मभेषु ।
नयेत् त्रिकोणादिदशामतन्द्री
भोगः च तद्वत् परिकल्पनीयः ॥ १९ ॥
तत्रैव खेटेषु शुभेषु विद्वान्
शुभं वदेन्नोऽशुभमेव नित्यम् ।

पर्यायतोऽत्रापि दशाविभागं
पदक्रमेणैव वदन्ति धीराः ॥ २० ॥
पाके च भोगे शनिचन्द्रदृष्टे
मृतिं नितान्तं प्रवदेदवश्यम् ।
तथैव हानीश्वरसंयुते वा
क्रूराख्यचन्द्रेण युतेऽपि तद्वत् ॥ २१
नीचेन वा क्रूरखगेन वापि
तद्वन् मृतिः स्यादिति निश्चयोऽत्र ।
कोणद्वये पापयुते तु बाधा[1]
राह्वीक्षिते स्यान्निगलप्रहारः ॥ २२ ॥
शुभे त्रिकोणे तु निरोधमात्रं
चन्द्रे तु नीचे परुषप्रसक्तिः ।
क्रूरैस्तथा नीचगतैर्भुजङ्ग-
कुजेन्दुदृष्टैः खलु दारुबन्धः ॥ २३ ॥
एवं च दुष्टार्गलसन्निवेशे
गृहाधिपानामपि वाच्यमेव ।
दशात्रिकोणे यदि गोचरस्य
रीत्या शुभः स्यात् शुभमेव वाच्यम् ॥ २४ ॥
पर्यायनाथो यदि गोचरस्य
रीत्यास्तगो नीचगतोऽरियुक्तः ।
तदा मनःक्लेशशरीररोग-
क्लेशव्ययादीन् प्रवदेन् नितान्तम् ॥ २५ ॥
पर्यायनाथाद् व्ययगो यदि स्यात्
भुजङ्गमो गोचरशास्त्ररीत्या ।
वदेत्तदानीं नृपतेर्विरोधात्
धनक्षयं चोरभयेन वापि ॥ २६ ॥

---

1. ग. क. बन्धः

पर्यायनाथो यदि सौम्यखेटैः
युतस्तदानीं धनलाभमेव ।
एवं हि सर्वत्र दशाविभागे
द्रष्टव्यमार्यैः फलशास्त्रविद्भिः ॥ २७ ॥

अयं न्यायः सकलदशामार्गेण विचारणीयः । विशिष्य त्रिकोणदशायां द्रष्टव्यत्वात् ॥ अस्य दशाया गोचरदशेत्यपि नामान्तरम् ।

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायामेकोनविंशोऽध्यायः ॥

केन्द्रदशा

अथ केन्द्रदशां मुनीश्वराणां मतमाश्रित्य वदामि सत्फलाय ।
बलिनो भवनाद्विलग्ननाथात्[1] क्रमतः केन्द्रदशां नयेद्विपश्चित् ।
चतुरश्रवशेन राशिमार्गः फलयोगस्तु नवग्रहक्रमेण ॥ १ ॥

प्रथमं केन्द्रमार्गेण द्वितीयं स्यात् द्वितीयतः ।
केन्द्रादिक्रमतः प्रोक्तं तृतीयं सर्वदा नृभिः ॥ २ ॥

चतुर्थं तु ततः प्रोक्तम् इयं राशिवशाद्दशा ।
ग्रहक्रमाद्दशां वच्मि ज्योतिर्वित्फलसिद्धये ॥ ३ ॥

प्रथमं लग्ननाथस्य द्वितीयं सप्तमेशितुः ।
तृतीयं तु चतुर्थेशात् चतुर्थं दशमेशितुः ॥ ४ ॥

द्वितीयं स्यात् पणपरे पञ्चमे तदनन्तरम् ।
षष्ठं स्यात् तत्पणपरे चैवमेव क्रमो भवेत् ॥ ५ ॥

इयं च गोचरवशात् संवादात् प्रबला भवेत् ।
अस्यां बह्वस्ति वक्तव्यं तदूहित्वा फलं वदेत् ॥ ६ ॥

चन्द्राश्रयेषु क्षेत्रेषु ग्रहाणामाश्रयो यथा ।
तत्तत्काले निश्चयेन ब्रूयादवितथं भवेत्[2] ॥ ७ ॥

---

1. च. बिलग्नतो वा 2. च. दपि तथा फलम्

शुक्राश्रयेषु क्षेत्रेषु स्त्रीसौख्यं निर्दिशेत् बुधः ।
गुर्वाश्रयेषु क्षेत्रेषु पुत्रसौख्यं विनिर्दिशेत् ॥ ८ ॥

बुधाश्रयेषु क्षेत्रेषु परस्त्रीसौख्यमादिशेत् ।
शन्याश्रयेषु क्षेत्रेषु मृतिकालं विनिर्दिशेत ॥ ९ ॥

राह्वाश्रयेषु क्षेत्रेषु शूलारोहणमादिशेत् ।
एवं दशासु सर्वत्र शुभानां योजनं भवेत् ॥ १० ॥

अन्यत्रायं विशेषस्तु क्रमेणैव वियोजयेत् ।
वृषे च वृश्चिके चैव व्युत्क्रमात् कुंभसिंहयोः ॥ ११ ॥

एवं केन्द्रं पणपरमापोक्लीबं प्रकल्पयेत् ।
अन्तर्भुक्तिः यथापूर्वमन्तरान्तरमेव च ॥ १२ ॥

कल्पयित्वा विशेषेण कारकादीन् विचक्षणः ।
फलं ब्रूयाद्विशेषेण राज्ञामपि तथा भवेत् ॥ १३ ॥

ओजयुग्मविशेषोऽत्र न कल्प्यः सर्वथा त्विति ।
युग्मे च व्युत्क्रमेण स्यात् ओजे तु क्रमतो नयेत् ।
इत्ययं प्रथमः पक्षः सर्वदा क्रमतः परः ।॥ १४ ॥

॥ अथ दशान्तरम् ॥

अथ मेषादितो विद्वान् दशाधर्मान् समानयेत् ।
प्रथमात्तु ततः पश्चात् ग्रहान्तं च समानयेत् ॥ १५ ॥

ततः पश्चात् ग्रहान्तं च दशा नेया विचक्षणैः ।
एवमेवं ग्रहा नेया मीनादिवृषभावधि ॥ १६ ॥

पश्चात् गृहाधिपदशावर्षाणि परिकल्पयेत् ।
तुलायां दीर्घताहेतौ तुलादि च समानयेत् ॥ १७ ॥

कन्यादिवृश्चिकान्तं च ग्रहान् सर्वत्र कल्पयेत् ।
राहोर्नीचस्य वा छिद्रदशायां निधनं भवेत् ॥ १८ ॥

चन्द्रशुक्रदशान्तेषु प्रायशः स्यात् शुभोन्नतिः ।
गुरुराशौ गुरोर्दृष्ट्या विवाहादि च कल्पयेत् ॥ १९ ॥

रवेर्दशान्ते नियमात् राजकोपाद्धनक्षयम् ।
कुजान्ते कुजदृष्टौ वा भ्रातृपीडां विनिर्दिशेत् ॥ २० ॥
शनौ वातादिबाधा स्यात् क्रूरैः क्रूरं विनिर्दिशेत् ।
शुभराशिस्थितः खेटो जयदः स्यान्न संशयः ॥ २१ ॥
पापराशिस्थितः खेटः पापमेव प्रयच्छति ।
तथैव नीचराशिस्थं नैच्यदं परिकल्पयेत् ॥ २२ ॥
कारकाश्चात्र विज्ञेयाः खेटाः पश्चाद्गृहस्थिताः ।
नियमेन दशान्तेषु देशत्यागो भवेन् नृणाम् ॥ २३ ॥
दशासंवादतो योज्या दशेयं सर्वदा नृभिः ।
अन्तर्दशाविधिश्चात्र वक्ष्यते फलसिद्धये ॥ २४ ॥
एनां दशां द्विधा कृत्वा प्रधानं भास्वदंशतः ।
होराक्रमेण क्रमतो व्युत्क्रमाच्च नयेत् सुधीः ॥ २५ ॥
शुभदृष्टे शुभयुते शुभमेव वदेत् सुधीः[1] ।
पापदृष्टे पापयुते नरो व्याधियुतो भवेत् ॥ २६ ॥
मिश्रे च मिश्रफलदा भुक्तिः ग्राह्या विचक्षणैः ।
क्षीणोऽपि शुभ एवात्र चन्द्रमाः परिकीर्तितः ॥ २७
बहुग्रहसमायोगे [2]हतान् कारकमार्गतः ।
नीत्वा ग्रहान् पृथक् कृत्वा फलं दैवविदूहयेत् ॥ २८ ॥
यदि मेषादिवृद्धिः स्यात् दशा जैमिनिसंमता ।
अथ लग्नादितो धीमान् दशां पूर्ववदानयेत् ॥ २९
लग्नादिवृद्धिकाख्या स्यात् दशा जैनानुसारिणी ।
ओजे तु क्रमतो नेया युग्मे स्यात् व्युत्क्रमान्विता ॥ ३० ॥
अन्यत् सर्वं [3]पूर्वदशामार्गेण परिकल्पनम् ।
अन्तर्दशाविभागस्तु द्रेक्काणांशर्क्षभेदतः ॥ ३१ ॥

---

1. च. क. सदा, ङ तदा 2. च. प्रोक्त
3. ग. ङ. सर्वदशा

एवं कृतेऽपवादोऽत्र कथ्यते [1]मुनिसंमतः ।
पश्चाल्लग्नस्य राहुश्चेत् दशा लग्नांशतो भवेत् ॥ ३२ ॥
शनिश्चेद्विपरीतेन दशा कल्प्येति निर्णयः ।
केतुश्चेत् क्रमतो नेया दशा दैवविदां सुखम् ॥ ३३ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां विंशोऽध्यायः ॥

पदक्रमेण प्रथमं दशा स्यात्
पर्यायभेदात् तदनन्तरं सा ।
द्विधा विभेदः चरनामभेदात्
द्वैधीकृता स्थूलदशा प्रशस्ता ॥ १ ॥
तस्यां दशायां प्रथमस्तदीशः
दिनेश्वरः स्यात्तदनन्तरं च ।
ततः खगेन्द्रोऽपि च तत्तथा स्यात्
केन्द्राधिपस्तत्क्रमतो विधाता ॥ २ ॥
एवं द्रगाणादपि लग्ननेतुः
क्रमेण संख्या विधिवत् प्रयोज्या ।
अन्तर्दशा संप्रति योजनीया
नवांशरीत्या नवधा विभक्ता ॥ ३ ॥
पुनस्त्रिधा कल्पयितुं समर्थः
रीत्या फलं सम्यगुदाहरेत ।
चन्द्राश्रये चन्द्रयुते तदीशे
शुभं वदेच्छोभनखेचरेन्द्रैः ॥ ४ ॥
पर्यायकं चरसंज्ञं [चराख्यपर्यायदशां] नराणां
प्रबुद्धलोकस्य हितानुषक्त्यै ।

---

1. ग, शास्त्रसंमतः

लग्नस्य सप्तमगृहस्य (पत्न्याश्च) बलं विचार्य
विद्वान्नयेद्बलगृहान्नियमादतन्द्री ॥
[बलान्नयेतापि गृहादतन्द्री] ॥ ५ ॥

पर्यायतस्तदखिलं चरनामधेयात्
वाच्यं पदक्रमविभागवशात् फलानि ।
सैवात्र गोचरदशा क्रमतो हि नेया
वामप्रक्लृप्तिरपि तद्वदिति प्रशस्तिः ॥ ६ ॥

अत्र कारकविधिर्मनुजानाम्
आत्मनः प्रथमकेन्द्रवशेन ।
कारका इति च जैमिनिशास्त्रा-
दागतं किल वदन्ति मुनीन्द्राः ॥ ७ ॥

लोके द्रगाणभवनादपि लग्ननाथात्
चन्द्राद्वदन्ति मुनयः परिकल्पनीयम् ।
आलोच्य यत्तदपि दिव्यवशाच्च सर्वं
ब्रूयात् कथञ्चिदपि सर्वदशाविपाके ॥ ८ ॥

दशाविपाके शुभयोगमार्याः
वदन्ति चान्यद् विपरीतमेव ॥

[1]अन्तर्दशाक्रमस्तु पदकृत् धृतिमति तनुसप्तभिश्च जामित्रभात् पुनरथो यदि चोपदेशात् ।

॥ अथापवादाः ॥

लग्नेश्वरो राहुयुतः स्याद्यदि तदा त्रिकोणाधिपः प्रथमपर्यायाधिपः । एवं सर्वत्राप्यूह्यम् । चन्द्रे लग्नाधिपतौ चन्द्रांशकाधीशमारभ्य पर्यायादिनेतारो नेयाः । तस्मिन्नपि राहुयुते लग्ने केन्द्रस्थितेषु बलवद्ग्रहः प्रथमपर्याय-कारकः । समृद्धफलसम्पदुदारशीलः । अथ प्रधानचरपर्यायदशालग्ने ओजे युग्मे वा लग्नसप्तमयोर्बलाबलं निश्चित्य लग्ने बलिनि तदादि, सप्तमे बलिनि

---

1. ग. अन्तर्दशाक्रमस्तु सप्ताकृधृति मति तनुजामित्रैरथोपदेशात् । इत्यन्तर्दशाक्रमः ।
ङ. अन्तर्दशाक्रमस्तु कृप्ता तु धृतिमति तनुजामित्रादथोपदेशाद्वा । इत्यन्तर्दशाक्रमः ।

तदादि प्रदक्षिणक्रमेणैव नेया । एवं लग्ने बलिनि स्वामी प्रथमपर्यायकारकः । द्वितीयस्य तु तत्केन्द्रवृत्तिः कारकः । एवं कारकान्निर्णीय पश्चात् फलानि ब्रूयात् । फलकथनप्रकारस्तु—

द्रष्टा भवेद्यत्र च योगनाथः
केन्द्राधिपो राशिपतिस्तदानीम् ॥ ९ ॥

तस्याप्येकत्वे चन्द्रमारभ्यैवेति ।

॥ अथ चन्द्रांशकदशा ॥

चन्द्रांशकप्रभृति चन्द्रमसो दशान्तं
तत्केन्द्रवर्तिखगमस्य च खेचरान्तम् ।
राशीश्वरावधि दशानयनं प्रशस्तं
चन्द्रावधीति कतिचिज्जगदुर्मुनीन्द्राः ॥ १० ॥

खेटान्निशाकरपदात् प्रथमं विपश्चित्
नीत्वा तु तत्पणपरादिविधानरीत्या ।
आपोक्लिमे च मुनयो विपरीतमाहुः
राशीश्वरे च विपरीततमं परत्र ॥ ११ ॥

॥ अथ भुक्तिक्रमः ॥

भुक्तानामपि भोग्यानां दशां नीत्वा पृथक् पृथक् ।
भुक्तानामेव भुक्तिः स्यात् भोग्यानां च परस्परम् ॥ १२ ॥

भुक्तभोग्यविधिस्त्वत्र वक्ष्यते फलसिद्धये ।
मेषस्य भुक्ता मीनाद्याः भोग्यास्तु वृषभादयः ॥ १३ ॥

वृषस्य भुक्ता मिथुनादयः स्युः
मेषादयो भोग्यपदं व्रजन्ति ।
एवं समालोच्य च भुक्तिभोग्य-
विधिं फलानि प्रवदेत् सभासु ॥ १४ ॥

भुक्तिराशिस्थितैः क्रूरैः भोग्यराशौ शुभेक्षिते ।
शुभमेव विजानीयात् तस्यां भुक्त्यां न संशयः ॥ १५ ॥

॥ अथ नक्षत्रभेददशा ॥

नक्षत्रेशगतान् भागान् लग्ननाथे वियोजयेत् ।
ततश्चरदशामार्गात् तमादायेश्वरान्नयेत् ॥ १६ ॥

योगदादपि चन्द्राद्वा नयेद्राशिक्रमाद् बुधः ।
दृष्ट्यारूढे प्रकल्पेत सर्वं दैवविदूहयेत् ॥ १७ ॥

केन्द्रस्थितैः त्रिकोणस्थैः शुभः स्यादन्यथाशुभः ।
भुक्तिः द्वादशधा वापि नवधोडुदशाक्रमात् ।
विज्ञेया सततं सद्भिः ज्योतिषार्थविचक्षणैः ॥ १८ ॥

इमामेव दशां सन्तः भेदेनापि पुरा जगुः ।
नक्षत्राधिपतेर्भागान् गतान् चन्द्रे प्रकल्पयेत् ॥ १९ ॥

लग्नादि च नयेद्राशीन् उच्चादींश्च प्रकल्पयेत् ।
पूर्ववत् फलजातं तु सर्वं ब्रूयाद्विचक्षणः ॥ २० ॥

अयं न्यायः रात्रिप्रसूतानामेव, न तु दिवाप्रसूतानाम्। अस्मिन् पक्षे ओजे लग्ने क्रमेण, युग्मे व्युत्क्रमेण । लग्ने राहौ चन्द्रे वा क्रमव्युत्क्रमौ वैपरीत्येन बोध्यौ। फलनिर्णयस्तु राशिग्रहवशादवगन्तव्यः। अत्रारूढप्रसक्तिः नास्ति। अत एवास्याः दशायाः अनारूढदशेत्यपि नामान्तरम् ।

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायामेकविंशोऽध्यायः ॥

अथ विधातृदशां मुनिसंमतां
फलविधौ फलकल्पकसंमिताम् ।
निगदतो मम वा भुवनान्तरे
किमु समोऽस्ति विरिञ्चिमृते जनः ॥ १ ॥

लग्नसप्तमयोः पूर्वं बलं दैवविदूहयेत् ।
ओजे लग्ने ततः प्रोक्तं युग्मे व्युत्क्रमतो नयेः ॥ २ ॥

बलराशेः पृष्ठभागे ओजे यः खेचरो भवेत् ।
तमारभ्य दशा नेयेत्यूचिरे तत्त्वदर्शिनः ॥ ३ ॥

दशानयनरीतिस्तु कथ्यते शास्त्रसंमता ।
मेषाद्यधीशपर्यन्तमोजानां स्याद्दशाक्रमः ॥ ४ ॥

मीनादिराशिपर्यन्तं युग्मानां तु दशां नयेत् ।
एवं दशायां नीतायां शुभाधिक्ये शुभं वदेत् ॥ ५ ॥

अत्रापवादा बहवः तान् वक्ष्ये फलसिद्धये ।
बलराशिवशान् नीतः राहुः प्रथमगो यदि ॥ ६ ॥

तदा सप्तमतः खेटान् प्रथमादि विचिन्तयेत् ।
तत्रापि केतोः प्राथम्ये केतुं त्यक्त्वेतरं नयेत् ॥ ७ ॥

शनौ तु प्रथमे तस्मात् व्ययरन्ध्रेश्वरो यदि ।
बली तस्मात्पृष्ठभागे स्थितः खेटस्तु कारकः ॥ ८ ॥

सर्वथौजे ग्रहाभावे युग्मस्थान् गणयेद् बुधः ।
द्विधा त्रिधा चतुर्धा वा खेटयोगानुसारतः ॥ ९ ॥

गणने यो भवेदोजे तदारभ्य दशां नयेत् ।
विधाता यदि नीचः स्यात् नैच्यं सर्वत्र योजयेत् ।
नीचग्रहसमायोगे नीचतुल्यो भवेन् नरः ॥ १० ॥

रविर्विधाता यदि राजभृत्यः
चन्द्रस्तु सामुद्रधनाधिकारी ।
कुजस्तु सेनाधिपतिर्बलाढ्यः
व्रणाङ्कदेहः सचिवो बुधः स्यात् ॥ ११ ॥

स्थूलाकृती राजसखोऽथवा स्यात्
बलाधिको राजकुमार एव ।
गुरुर्मतः शास्त्रकलानिरूढः
मन्त्री भवेत् राजपुरोहितो वा ॥ १२ ॥

शुक्रः सदा स्त्रीरसिकस्सुबुद्धिः
धनाधिकश्चेति विदुर्मुनीन्द्राः ।
शनिर्बलाढ्यः कृशदीर्घदेहः
प्रेष्योऽथवा स्यात् कृषिजीविको वा ॥ १३ ॥

राहुस्तु नीचोऽप्यथ नीचकर्म-
कारी भवेत् सौम्ययुते शुभं स्यात् ।
एवं विधातुः परिचिन्त्य धीमान्
वदेत्सभायां[1] नियतं फलानि ॥ १४ ॥

एवं दशाकारकनिर्णयः । प्रथमदशाया धाता कारकः । तदंशराशिमारभ्य नवांशक्रमेण द्वितीयादीनामधिपतयो ज्ञेयाः । अन्तर्भुक्तिक्रमस्तु यो दशाधिपतिः कारकः तदंशराशिमारभ्य नवांशक्रमेण भुक्तयो ज्ञेयाः । भुक्तिकारकास्तु राशीश्वरवशादेवावगन्तव्याः । एवं सति यस्मिन् राशौ शुभो वा उच्चो वा तस्मिन् शुभम्, यस्मिन् राशौ अशुभः तस्मिन् दशावसाने क्लेशः । यत्र राशौ शुभाशुभौ मिलितौ तत्रावश्यं शुभाशुभं वाच्यम् । अस्यां दशायां योगस्यैव निर्णीतत्वात् योगदशेत्यपि नामान्तरम् ।

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रविरचितायां ज्योतिषफलरत्न-मालायां द्वाविंशोऽध्यायः ॥

अथान्याश्च दशा धीमान् यथामति यथागुरु ।
फलशास्त्रानुसारेण योजयेन्निश्चितात्मवान् ॥ १ ॥

विस्तारभीत्या हि[2] मया प्रोक्तस्तु लघुतो यतः ।
तस्मात्कल्पलतारीत्या सर्वं दैवविदूहयेत् ॥ २ ॥

अथायुर्विषयो नृणां कथ्यते शास्त्रसंमतः ।
शीर्षोदयं निषेकञ्च भूमौ पतनमित्यपि ॥ ३ ॥

लग्नानां निर्णयं प्राहुः लोके शास्त्रविदो जनाः ।
कृते त्रेतायुगे चैव निषेको लग्नमुच्यते ॥ ४ ॥

शीर्षोदयो द्वापरे स्यात् कलौ भूपतनं स्मृतम् ।
दश वर्ष सहस्राणि ज्योतिश्शास्त्रं कलौ युगे ॥ ५ ॥

तत्रापि पञ्चसाहस्रं फलसिद्धिः कलौ युगे ।
गणितं दशसाहस्रं भूमौ तिष्ठति सर्वदा ॥ ६ ॥

---

1. ङ. दशायां 2. च. न मया प्रोक्ता स्थूलतया यतः ।

यदा विष्णुर्दिवं गच्छेत् तदा वेदविपर्ययः ।
यदा वेदविपर्यासः तदा ज्योतिर्दिवं व्रजेत् ॥ ७ ॥
तस्मात् पञ्चसहस्राणि वर्षाणि मनुजर्षभैः ।
शीर्षोदयं समारभ्य विचिन्त्यं न विचक्षणैः ॥ ८ ॥
किं तु भूपतनादेव फलाफलविनिर्णयौ ।
कृते पञ्चसहस्राणि संख्यायुः परिकीर्तिता ॥ ९ ॥
त्रेतायां तु त्रिसाहस्रं द्वापरे द्विसहस्रकम् ।
कलौ सहस्रं संख्यातं नृणामायुर्मुनीश्वरैः ॥ १० ॥
धर्मलोपाद्दयालोपात् क्रूरकृत्यादिकारणात् ।
दिने दिने क्षयं याति नृणामायुः कलौ युगे ॥ ११ ॥
अष्टोत्तरशतं नृणां तस्मादायुर्विनिर्णयः ।
तत्रापि नियतिर्नास्ति पापयोगाद्दिनेदिने ॥ १२ ॥
एतदायुस्त्रिधा कृत्वा दीर्घमध्याल्पतां नयेत् ।
देवद्विजगुरुद्रोहगुरुदारादिगामिनः ॥ १३ ॥
अल्पायुषो नरा लोके भवन्ति नियमात् सदा ।
ये राजसा नरा लोके ते स्युर्मध्यमजीविनः ॥
ये सात्विकाश्च धर्मिष्ठाः तेषां पूर्णं विनिर्दिशेत् ।
वियोनिजनयो ये स्युः तन्मुखं नावलोकयेत् ॥ १५ ॥
बाल्य एव प्रमीयन्ते ऋणिनोऽत्र कलौ युगे ।
एवं निश्चित्य मतिमानूहयेत् फलसंपदम् ॥ १६ ॥

॥ अथ बालारिष्टयोगः ॥

धाता विलग्नाधिपतिः कारकश्चास्तनीचगः ।
क्रूरैर्युतो वा दृष्टो वा जातो जीवेद्दिनत्रयम् ॥ १७ ॥
चन्द्रः क्रूरैर्युतो दृष्टो न चिरान्मरणप्रदः ।
शुभदृष्टिविहीनश्च शुभांशकगतो न चेत् ॥ १८ ॥
चन्द्रे क्रूरयुते दृष्टे क्रूर एव नरः सदा ।
राहुयुक्तोऽथवा धाता कारको वा बिलग्नपः ॥ १९ ॥

पूर्णायुर्योगजातश्चेत् नचिरादेव नश्यति ।
लग्नसप्तमयोः क्रूराः चन्द्रः क्रूरेण संयुतः ॥ २० ॥

राहुर्विलग्नभवनत्रिकोणे मरणप्रदः ।
लग्ननाथनिशानाथौ[1] रन्ध्रव्ययपसंयुतौ ॥ २१ ॥

लग्नं वा रन्ध्रनाथेन दृष्टं चेन् मरणप्रदम् ।
दशाधिनेता प्रथमः यदि क्रूरग्रहैर्युतः ॥ २२ ॥

नीचो वा नीचयुक्तो वा नचिरादेव नश्यति ।
भुक्तीश्वरो वा रन्ध्रेशयुक्तो भुजगवीक्षितः ॥ २३ ॥

तद्भुक्तौ निधनं कुर्यादिति सर्वज्ञभाषितम् ।
लग्नत्रिकोण[2]नाथेन द्वित्रिपापयुतिर्यदि ॥ २४ ॥

अचिरान्मरणं ब्रूयात् लग्नपे शुभवीक्षिते ।
द्रेक्काणात् सप्तमेशस्याप्येवमेव हि योजयेत् ॥ २५ ॥

ओजयुग्मानुसारेण द्रेक्काणाद्रन्ध्रपो यदि ।
राहुयुक्तो निरीक्षेत नचिरादेव नश्यति ॥ २६ ॥

द्रेक्काणभवनं सौम्याः पश्यन्ति यदि चेत्तदा ।
पूर्णमायुर्विजानीयात् एवं सर्वत्र निर्णयः ॥ २७ ॥

द्रेक्काणभात् त्रिकोणस्थाः ग्रहाः क्रूराश्च हानिदाः ।
राहुयोगे विशेषेण मृतिमेव विनिर्दिशेत् ॥ २८ ॥

चन्द्रः क्रूरयुतो द्रगाणभवनं पापैर्युतं लग्नपः
रन्ध्रेशेन युतो विधातृखचरो नीचोऽथवा तद्युतः ।
आत्मास्तंगत इत्ययं शिशुमृतौ योज्यस्सुधीभिस्सदा
ह्येकैकेन विनाशमेति शुभगैः खेटैस्सुखी जीवति ॥ २९ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-
विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-
मालायां त्रयोविंशोऽध्यायः ॥

---

1. ङ. दशानाथौ 2. च. द्रेक्काण

लग्ने चतुष्पदि शशाङ्कगते तदीशे
युक्ते चतुष्पदखगेन भवेद्वियोनिः ।
चन्द्रार्कजौ व्ययगतेन भुजङ्गमेन
युक्तौ तदा विकुरुते हि वियोनिजन्मा ॥ १ ॥

लग्ने चतुष्पदे चैव द्रेक्काणे च तदात्मके ।
क्रूरदृष्टे युते वापि पशुजन्म विनिर्दिशेत् ॥ २ ॥
नीचे शशिनि लग्नस्थे द्रेक्काणे सर्पधारिणि ।
भुजङ्गमयुते दृष्टे सर्पजन्म विनिर्दिशेत् ॥ ३ ॥
भुजङ्गमयुते लग्ने लग्नेशे क्रूरसंयुते ।
शाखास्थधारिद्रेक्काणे जातो वानरजन्मभाक् ॥ ४ ॥

कीटकर्किमृगलग्नजन्मनां
चन्द्रमोध्वजफणीन्द्रवीक्षणे ।
लग्नपो यदि च नाशगस्तदा
नालवेष्टनमुशन्ति पण्डिताः ॥ ५ ॥

विलग्ननाथो यदि वा शशाङ्कः
राहोर्मुखं केतुमुखं प्रयातः ।
रन्ध्रारिनाशव्ययखेचरेन्द्रैः
दृष्टे वियोनिं वितनोति लग्नम् ॥ ६ ॥

एवं वियोनिपरिवेष्टनबालमृत्युं
शास्त्रान्तरादपि विलोक्य वदेदतन्द्री ॥

अथ गुरूपदेशक्रमप्राप्तं बालारिष्टं कथयति ।

कालेश्वरे वारपतौ विलग्ननाथे भुजङ्गेन युते भुजङ्गे ।
रन्ध्रेश्वरे चापि तथा वियोनौ जातो मृतिं याति दिनान्तराले ॥ ७ ॥

शुभदृष्टे शुभं विद्यादन्यथा त्वशुभं भवेत् ।
तत्काले लग्ननाथस्य गतभागान् ग्रहेशितुः ॥ ८ ॥

भागैर्मानक्रियारुद्रैः गणयेद् बुद्धिमान्नरः ।
तत्काले लग्ननाथेन युता खेटक्रमाद्भवेत् ॥ ९ ॥

ग्रहाणि निर्दिशेत्प्राज्ञः मानलब्धास्तु वीथिकाः ।
तद्रुद्रगणसंख्याता वेदरुद्रविभाजिताः ॥ १० ॥
तत्तद्ग्रामस्थिताः प्रोक्ता जनाः शास्त्रार्थवेदिभिः ।
[1]तासूक्ताश्चैव ये पश्चात् खेटाः स्थावरसंज्ञिकाः ॥११ ॥
बालाः पूर्वगताः खेटाः स्यात् केतौ द्वेषवान्नरः ।
नीचराहुयुतौ ते स्युः खेटांशाश्चन्द्रभागिनः ॥ १२ ॥
अधःकाये व्रणादीनि केतोस्तैरूर्ध्वकेऽङ्गके ।
.....वसुदीपमालाः प्रकीर्तिताः ॥ १३ ॥
अन्धग्रहयुते दृष्टे दीपहानिं विनिर्दिशेत् ।
आरार्कौ चोरपञ्चकौ.....चन्द्रः ।
सारूप्यं वा शुभविधौ नियतं दैवविन्नयेत् ॥ १४ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां चतुर्विंशोऽध्यायः ॥

॥ अथायुर्दायविधिः ॥

लग्ने चरे चरे चन्द्रे पूर्णमायुर्विनिर्दिशेत् ।
लग्ने चरे स्थिरे चन्द्रे मध्यमायुर्विनिर्दिशेत् ॥ १ ॥
लग्ने चरे द्विस्वभावे चन्द्रे त्वल्पं विनिर्दिशेत् ।
लग्ने स्थिरे चरे चन्द्रे मध्यमायुविनिर्दिशेत् ॥ २ ॥
लग्ने स्थिरे द्विस्वभावे चन्द्रे पूर्णं विनिर्दिशेत् ।
लग्ने स्थिरे स्थिरे चन्द्रे त्वल्पायुस्सर्वथा भवेत् ॥ ३ ॥
लग्ने द्वन्द्वे स्थिरे चन्द्रे पूर्णायुस्सर्वदा नरः ।
लग्ने द्वन्द्वे द्विस्वभावे चन्द्रे मध्यं विनिर्दिशेत् ॥ ४ ॥
लग्ने द्वन्द्वे चरे चन्द्रे त्वल्पायुष्यं विनिर्दिशेत् ।
होरालग्नभयोरेवं लग्नभावपयोरपि ।
आयुर्निर्णीय मतिमान् दशाः पश्चात् प्रकल्पयेत् ॥ ५ ॥

---

1. अस्मिन् अध्याये न कुत्रापि मातृकायां समीचीनपाठ उपलभ्यते । क्वचिद् भाग एव लिखितः ।

नक्षत्रे गतभागान् राशेरप्येवमेव संयोज्य ।
नाडीलब्धं गणयेत् पश्चादप्येवमेवं स्यात् ॥ ६ ॥

दशां नक्षत्रजां विद्वान् चन्द्रादायुर्विधौ नयेत् ।
नीतायां यदि सा नीचा नीचो वाप्यथ राशिगः ॥ ७ ॥

पापाः पापौ च पापो वा दशाराशौ स्थिता यदि ।
भुजङ्गेन युतो दृष्टो तद्दशान्ते मृतिं वदेत् ॥ ८ ॥

भुक्तिक्रमस्तु नवधा दशाराश्यादितो गतः ।
तृतीयव्ययरन्ध्रेशयुतिर्मृतिविधायिनी ॥ ९ ॥

क्रूरग्रहयुते वापि क्षीणचन्द्रेण संयुते ।
एवं नक्षत्रदशया मृतिकालं विनिर्दिशेत् ॥ १० ॥

इत्येवं लोकरीत्यैव सर्वमन्यद्विचिन्तयेत् ।
अथापरदशालग्नात् ओजयुग्मभिदा कृता ॥ ११ ॥

नेया पर्यायतो विद्वद्भैरर्ज्योतिषकोविदैः ।
दशाराशौ तथा भोगे फणिमन्देन्दुवीक्षिते ॥ १२ ॥

मृतिमेव विजानीयादिति सर्वज्ञभाषितम् ।
चन्द्रे षष्ठे त्रिकोणे वा पापचन्द्रनिरीक्षिते ॥ १३ ॥

तस्मिन् राशावपि मृतिं प्रवदन्ति मनीषिणः ।
राहुणैकेन संदृष्टे नीचो राशीश्वरो यदि ॥ १४ ॥

तदानीं च मृतिं ब्रूयादिति केचित् प्रचक्षते ।
त्रयोऽल्पायुषि पर्यायाः पञ्चमो मध्यमायुषि ॥ १५ ॥

पूर्णायुषि तदूर्ध्वं स्यादिति शास्त्रस्य निर्णयः ।
वाराधिपोऽपि कालेशः नीचगो राहुसंयुतः ॥ १६ ॥

अचिरादेव मरणं कुर्यादित्येव निर्णयः ।
पर्यायराशौ प्रथमे क्षीणेन्दुफणिवीक्षिते ॥ १७ ॥

तत्पर्यायेश्वरे नीचे नीचखेटेन वा युते ।
भुजङ्गमयुते वापि शनिचन्द्रनिरीक्षिते ॥ १८ ॥

त्रिकोणस्थे पापखेटे तस्मिन्नेव मृतिं वदेत् ।
पर्यायाणां विनिर्दिष्टाः कारका राशिमार्गतः ॥ १९ ॥

चरे पश्चाद्ग्रहः प्रोक्तः प्रथमस्य हि कारकः ।
स्थिरे ब्रह्माणमारभ्य षष्ठखेचरमार्गतः ॥ २० ॥

उभये ब्रह्मकेन्द्रादिकारकाः परिकीर्तिताः ।
एवं सर्वत्र पर्यायकारकाः परिकीर्तिताः ॥ २१ ॥

कारकप्रकरणे तु राश्यधिप एव प्रथमपर्यायकारकः । एवं तमारभ्य[1] राशिवशात् पर्यायकारका निर्देश्याः । केचित्तु अंशाधिपतिमादायैव ग्रहक्रमेण कारकान् कल्पयन्ति । एवं कारकनिर्णयं कृत्वा तस्य कारकस्य स राशिरुच्चो वा नीचो वा शुभक्षेत्रं वा मित्रक्षेत्रं वा इति विचार्य फलनिर्देशः कर्तव्यः । अन्तर्भुक्तावप्येवमेव ज्ञातव्यम् । इयं तावत् लग्नपर्यायदशा । अथ लग्नेश-पर्यायदशा ।

ओजयुग्मादिभिर्व्यक्तात् लग्नात् सप्तमभावतः ।
बलराशीश्वरं ज्ञात्वा तस्मात् पर्यायमानयेत् ॥ २२ ॥

लग्नेशस्थितराशेस्तु पर्यायः प्रथमो भवेत् ।
चरे क्रमेण तन्मार्गात् स्थिरे षष्ठक्रमान्नयेत् ॥ २३ ॥

उभये केन्द्रमार्गेणेत्येकः पक्षः प्रकीर्तितः ।
अथवा क्रमतो नेयं केचिदिच्छन्ति सूरयः ॥ २४ ॥

पाके भोगे पापयुते दृष्टे तस्मिन् मृतिर्भवेत् ।
पाकभोगप्रकारस्तु वक्ष्यते शास्त्रसंमतः[2] ॥ २५ ॥

दशाराशिः पाकराशिः भोगस्तस्मात्ततः स्मृतः ।
तस्मिन् फणीन्दुनीचार्किक्रूरदृष्टे मृतिर्भवेत् ॥ २६ ॥

॥ शुभाशुभकथनप्रकारः ॥

शुभास्त्रिषष्ठव्ययरन्ध्रनाथाः
पापास्तदन्ये तु शुभाशुभाः स्युः[3] ।

---

1. ग. सप्तालोक्य । 2. ङ. शिलमैः 3. च. त्वशुभाः शुभान्ये

नीचः शुभोच्चेन युतश्शुभः स्यात्
चन्द्रस्सदा पाप इति प्रसिद्धिः ॥ २७ ॥

चन्द्रोऽपि स्वोच्चराशिस्थः शुभ एव न संशयः ।
तत्रापि क्षीणचन्द्रश्चेत् पापमेव विनिर्दिशेत् ॥ २८ ॥

बुधयुक्तग्रहवशात् बलाबलविनिर्णयः ।
एवं शुभाशुभं धीमान् विचार्य ग्रहतत्त्वतः ॥ २९ ॥

शुभदृष्टौ शुभं ब्रूयादशुभे त्वशुभं सदा ।
उत्तमायुर्भवेत् नृणां मध्याल्पे ह्यायुषी तथा ॥
एवं विचार्य मतिमान् नृणामायुर्विनिर्दिशेत् ॥ ३० ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां पञ्चविंशोऽध्यायः ॥

॥ अथ लग्नांशकदशा ॥

दुर्बलात्प्रबलाद्वापि लग्नादंशं प्रकल्पयेत् ।
तस्मिन् क्रूरखगैः दृष्टे त्वल्पायुष्यं विनिर्दिशेत् ॥ १ ॥

मिश्रे मध्यममायुः स्यात् शुभैः पूर्णं भवेन् नृणाम् ।
एवमायुः पुरा ज्ञात्वा पश्चान्निर्याणमादिशेत् ॥ २ ॥

लग्नांशराशिमारभ्य दशां पर्यायवन्नयेत् ।
ओजे क्रमेण सा नेया युग्मे सा व्युत्क्रमात् भवेत् ॥ ३ ॥

एवं नीत्वा दशां धीमान् तद्दृष्टे मृतिमादिशेत् ।
अथवा तां चरदशामार्गेणापि नयेत्सुधीः ॥ ४ ॥

लग्नांशाधीश्वरौ क्षीणचन्द्रदृष्टौ मृतिं वदेत् ।
अन्तर्दशां तु पर्याये द्वादशांशक्रमान्नयेत् ॥ ५ ॥

दशायां सा नवांशस्य क्रमतो भवति ध्रुवम् ।
तत्रापि [1]क्रूरहिमगुफणिदृष्टे मृतिं वदेत् ॥ ६ ॥

---

1. ब. क्रूरहिमशु

॥ अथापवादाः ॥

लग्नसप्तमयोः राहुचन्द्रयोः स्थितयोः तदंशः एव लग्नांशो ग्राह्यः। लग्नांशराशौ राहुश्चेत् तदीश्वरस्थितराशिरेव लग्नांशो ग्राह्यः। एवं नीतालग्नांशात् आरभ्य पर्यायक्रमतो वा चरदशामार्गेण वा दशां नीत्वा अंशाधीश्वरराहुचन्द्रदृष्टेषु निर्याणं ब्रूयात्।

॥ इति लग्नांशकदशा ॥

॥ अथ ब्रह्मखेटदशा ॥

ओजे लग्ने सन्मुखं प्राप्य पश्चात्
ज्ञेयो ब्रह्मा चौजराशिक्रमेण।
तस्मान्नेया स्याद्दशा शास्त्ररीत्या
लोके नृणामायुषो निर्णयाय ॥ ७ ॥
तस्मिन् चरे क्रमेण स्यात् स्थिरे षष्ठक्रमेण सः।
उभये केन्द्रमार्गेण दशामेवं प्रकल्पयेत् ॥ ८ ॥
एवं नीतायां दशायां खगेन्द्रैः
क्रूरैर्दृष्टे मृत्युमेवादिमर्क्षे।
नो चेत्क्रूरैः संयुतो दृष्टिभेदात्
नृणामायुः संक्षिपेत् दैवतज्ञः ॥ ९ ॥
अथवेमां क्रमेणैव दशां पर्यायमार्गतः।
नीत्वा पापग्रहयुतौ दृष्टौ वा मृतिमीरयेत् ॥ १० ॥
केचिच्चरदशामार्गादिमामिच्छन्ति सूरयः।
तत्पक्षे षष्ठरन्ध्रेशदृष्टराशौ मृतिं वदेत् ॥ ११ ॥
क्षीणचन्द्रेण फणिना दृष्टे वा मृतिरेव हि।
अस्यां बह्वस्ति वक्तव्यं तदूहित्वा मृतिं वदेत् ॥ १२ ॥

॥ अत्र धात्रानयनपक्षेऽपवादः, निर्याणकारकनिर्णयश्च ॥

अयमर्थः

लग्ननिर्णये कृते लग्ने राहौ सन्मुखप्राप्तलग्नेऽपि ओजे वैपरीत्येनैव धातृग्रहणं कार्यमित्येकोऽपवादः। धातरि राहौ शनौ वा तस्मात् पश्चात्-

गृहस्थित एव धाता भवति । तमारभ्य दशा नेयेति द्वितीयोऽपवादः । धातुः राहुकेत्वन्यतरयोगश्चेत् धातृस्थितराश्यधिपतिरेव धाता इति तृतीयोऽपवादः । लग्नपतिना साकं धातुः सम्बन्धे लग्नपतिरेव धातेति चतुर्थोऽपवादः । एवमपवादचतुष्टयमालोच्य धातारं निर्णीय पश्चात् मारकमादिशेत् । तत्रैवंभूताद् धातुस्तृतीयषष्ठाष्टमव्ययेशेषु बलवान्निर्याणकारकः । ओजेषु बलवत्स्वपि उक्तस्थानेषु राहुचन्द्रयोगश्चेत् स एव निर्याणकारक इत्यूह्यम् । तयोरपि बलाबलनिर्णयक्रमस्तु राशिवशादुच्चत्वादिव्यवस्थया वा द्रष्टव्यः । इति धातृपर्यायदशा धातृदशा च ।

॥ अथ शून्याशून्यायुर्दायः ॥

लग्नकेन्द्रेषु सर्वेषु सग्रहेष्वग्रहेषु वा ।
दीर्घमायुरथ स्वल्पं रन्ध्रकेन्द्रे तथाविधे ॥ १३ ॥
मिश्रे मध्यममेवायुः नृणां सर्वत्र योजयेत् ।
ततः पर्यायमार्गेण दशा नेया विचक्षणैः ॥ १४ ॥
उक्तलक्षणसद्भावे लग्नस्य च ततो भवेत् ।
रन्ध्रस्य चोक्तसद्भावे रन्ध्रादि च दशा भवेत् ॥ १५ ॥
मिश्रे लग्नाद्विजानीयात् रन्ध्राद्वापि विशेषतः ।
एवं पर्यायमार्गेण पापदृष्टौ मृतिं वदेत् ॥ १६ ॥
अन्तर्दशाविशेषस्तु वक्ष्यते फलसिद्धये ।
दशेशस्थितराश्यंशक्रमेणान्तर्दशेश्वराः ॥ १७ ॥

॥ शून्याशून्यदशा समाप्ता ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्तविद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्नमालायां षड्विंशोऽध्यायः ॥

॥ अथात्मकारकांशकदशा ॥

स्वकारकांशान्मतिमान् पर्यायेण दशां नयेत् ।
तस्मादष्टमनाथांशदृष्टौ मृतिमुदीरयेत् ॥ १ ॥
अथवा स्याच्चरदशामार्गेणापि दशां नयेत् ।
तद्दृष्टौ निधनं ब्रूयादिति शास्त्रस्य निर्णयः ॥ २ ॥

॥ अत्रापवादः ॥

स्वकारकाद्व्ययगते राहौ मन्देऽथवा यदि ।
तमारभ्य दशा नेयेत्यूचिरे तत्त्वदर्शिनः ॥ ३ ॥
पञ्चमे वाथ नवमे राहुकेतू स्थितौ यदि ।
तमेव कारकं मत्वा पर्यायं क्रमतो नयेत् ॥ ४ ॥
पर्यायाधिपतौ नीचे प्रथमे तत्तदंशतः ।
पर्यायेशाः सदा ग्राह्या इति सर्वज्ञभाषितम् ॥ ५ ॥
एवं सदापवादानां निश्चयेन विचक्षणः ।
आलोच्य मतिमान् सम्यक् ईरयेच्छास्त्रसंमतम् ॥ ६ ॥
सर्वत्र पर्यायविधौ भुक्तिः द्वादशधा भवेत् ।
अन्यास्वपि दशास्वाहुः नवांशक्रमतो भिदाम् ॥ ७ ॥

॥ अथ लग्नद्रेक्काणदशा ॥

लग्नद्रेक्काणपो यस्मिन् राशौ भवति खेचरः ।
तदादितो दशा ग्राह्या पर्यायक्रमतोऽत्र हि ॥ ८ ॥
तस्मिन् द्व्यादिशुभैर्युक्ते पूर्णमायुर्विनिर्दिशेत् ।
विपरीते तदाल्पायुः मिश्रे मध्यममादिशेत् ॥ ९ ॥
एवमायुः पुरा ग्राह्यं दशा पश्चाद्भवेत्ततः ।
प्रथमः स्यात् द्रगाणेशः स्थितराशेस्ततो दशा ॥ १० ॥
द्वितीया तु तृतीयस्य राशेर्नेया विचक्षणैः ।
तृतीया तु ततो ज्ञेया तृतीयस्येति[1] सर्वदा ॥ ११ ॥
एवमेकान्तरतया दशया दैववित्तमः ।
फलं ब्रूयाद्विशेषेण राज्ञामपि तथा भवेत् ॥ १२ ॥
इमामेव दशामाहुरैश्वर्ये लग्नपादिह ।
[2]भुक्तिक्रमस्तु खेटानामैकैकांशावभाजिताम् ॥ १३ ॥
एकैकां[3] दशधा छित्वा तृतीयां नवतो नयेत् ।
पादादिकवशाद्भिन्ना दशायां सर्वथा भवेत् ॥ १४ ॥

---

1. च. स्यापि 2. च. भुक्तिः क्रमेण
3. च. कामष्टधा

नित्यसंख्या दशा ज्ञेया नित्यानित्यैस्सदा तु सा ।
भिन्ना गौरौ द्विधा लोके नवधा वा प्रयोजिता ॥ १५ ॥
नेत्रा वा गुणिता सा स्यात् वर्षोत्पत्तौ फलं भवेत् ।
जातकं व्युत्क्रमान्नीतं [1]लौकिकं परिचक्षते ॥ १६ ॥

॥ अथ पदनाथांशदशा ॥

पदनाथांशराशीशात् दशा नेया तु पूर्ववत् ।
पदनाथस्थिते राशौ भवेदायुस्समापनम् ॥ १७ ॥
तद्दृष्टौ वा मृतिं विद्यादित्येके मुनयो जगुः ।
दशाक्रमस्तु चरभे चरमार्गेण योजयेत् ॥ १८ ॥
स्थिरे तु षष्ठक्रमतः केन्द्रतोभयमार्गतः (चोभये केन्द्रमार्गतः) ।
तत्क्रमेण ग्रहा नेया इति शास्त्रविदो जनाः ॥ १९ ॥

॥ अथ वर्णदशा ॥

वर्णदो गौरमुखतो युग्मे गौरादितत्क्रमात् ।
नीत्वा त्वार्यक्रमेणैव खेटान् सर्वान् वियोजयेत् ॥ २० ॥

अथवा इयं दशा जन्तुमात्रविशिष्टा न तु स्वतन्त्रा । मनुष्याणां तु वर्णदशोच्यते ।

ओजे मेषादिहोरान्तं लग्नान्तं गणयेद् बुधः ।
युग्मे मीनादि होरान्तं लग्नान्तं व्युत्क्रमान्नयेत् ॥ २१ ॥
चन्द्रान्तं चैव होरान्तं केचिदिच्छन्ति सूरयः ।
लग्नाधिनाथात् द्रेक्काणात् होराया वा दशां नयेत् ॥ २२ ॥
वर्णदस्य त्रिकोणर्क्षे पापदृष्टे मृतिर्भवेत् ।
राशिवीक्षणसंवादे व्याधिर्भवति निश्चयात् ॥ २३ ॥
राशियोगे द्रगाणे वा होरायां वा मृतिः भवेत् ॥
स्फुटविश्लेषसंसिद्धो राशिर्वर्णद इष्यते ।
तत्र विप्रादिभेदेन मृतिलक्षणमीरयेत् ॥ २४ ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्त-विद्यावैदुष्य श्रीकृष्णमिश्रकृतौ ज्योतिषफलरत्न-मालायां सप्तविंशोऽध्यायः ॥

1. ब. लौकिकं

॥ अथ चतुष्पादायुःप्रकारः ॥

एकैकराशेः पर्यायं वर्षत्रयमितं विदुः ।
उत्तमादिविचारश्च तत्र स्याद्भूस्वजन्मनाम् ॥ १ ॥
गजानां तु नृणां रीतिः द्विपादानामयं क्रमः ।
षोडशाब्दपरीमाणं पर्यायक्रमतो नयेत् ॥ २ ॥
नागानां तु विशेषोऽयं तत्तावत्परिकल्पयेत् ।
वृषाणां वापरविधिमारूढानां च संमतम् ॥ ३ ॥
कृते दशानां क्लृप्तिस्तु मार्गेणानेन सर्वदा ।
चन्द्राङ्गारकसौम्यशुक्रगुरवः स्युः सूर्यभागक्रमात्
भागस्यैकशतं नृणां कृतयुगे त्वायुर्विधाने दशाः ।
मन्दस्यार्कसमः फणिध्वजवतां तत्र प्रसक्तिर्न वै
पापाभावतया युगस्य कतिचिन्नेच्छन्ति तस्येप्सितम् ॥ ४ ॥

॥ अत्रैवगर्गः ॥

कृते युगे सूर्यपुरोगमाः स्युः
ग्रहास्तु सप्तैव तथा तदायुः ।
चतुःसहस्रं च दशाप्रकृल्प्ति-
रर्कस्य भागक्रमतो वदन्ति ॥ ५ ॥
यदा यदा तस्य दशावसानं
तदा तदा तस्य मृतिं वदन्ति ।
दशाधिनाथास्तु शशाङ्कवक्र-
ज्ञशुक्रदेवेन्द्रपुरोहिताः स्युः ॥ ६ ॥
रविश्च मन्दो भुजगेन्द्रकेतू दशाधिपत्यं व्रजतो न नित्यम् ।
तस्मिन् युगे न बालानां मृतिः नाल्पायुषो नराः ॥ ७ ॥

अयमर्थ :—

रवेः स्फुटं निश्चित्य एकैकभागस्य एकशतसंख्ययायुर्निर्णयः । क्रूरदशावहुजीविनां कथमायुर्निर्णय इति चेत्तेषामपि परप्राप्त्यवधि तज्जन्म तदनन्तरं जन्मान्तरमिति निष्कर्षः । देवराक्षसजातीनां तु शास्त्रं प्रत्येकम् ।

तच्च देवलोके प्रसिद्धम् । तदपि [1]बालाकटाक्षवशात् वयं जानीमः । तथापि मनुष्यलोकप्रचाराभावात् मया न लिखितम् । त्रेतायां तु पूर्वयुगवच्च चन्द्रस्फुटवशेन [2]भागायुरानयनं । दशाधिपतयस्तु चन्द्रमारभ्य क्रमेण नेयाः ।. द्वापरे तु अस्य सूत्रशास्त्रस्य प्रवृत्तिः । पर्यायस्तु विंशाधिकशतम् । इतरत सर्वमपि तद्वशेनैव ज्ञातव्यं । द्वापरे तु व्यासशिष्यो जैमिनिः व्यासप्रसादादष्टाध्यायं सूत्रशास्त्रमकरोत् । पूर्वेकाले तु सर्वेऽपि ज्ञानचक्षुषः । तस्मादेतच्छास्त्रमनपेक्ष्यम् । अस्मिन् युगे तु ज्ञानदृष्टयभावात् अवश्यं कर्तव्यमिति महामुनिनोक्तम् । तद्व्यासः श्रुत्वा यावत् ज्ञानचक्षुषः लोके स्थास्यन्ति तावत ज्ञानेनैव सर्वमपि वेदयिष्यन्ति । तदनन्तरमेतत् ग्रन्थनिर्देशः आवश्यक इति उवाच । एतावत्पर्यन्तं दत्तात्रेयादिमुनयो लोके सञ्चारं कृत्वा सर्वमपि वेदयिष्यते (अवेदिषुः) । इदानीं तु तेऽपि न दृग्गोचरा इति मया श्रीबालामुपतिष्ठमानेन देवीपरमेश्वरयोः कृपाकटाक्षवशात् प्रकटीकृतम् । देवोऽपि स्वप्ने मामुवाच कलावेकोनविंशाब्दपरिवृत्तौ काण्वः कृतोदनो नाम ऋषिः शापेन वाञ्छिनाथ इति दाक्षिणात्यो भविष्यति तावदवधिकमयं त्वत्कृतो ग्रन्थः जनेषु प्रचरिष्यतीति । तदर्थमिमे निर्मिता ग्रन्थाः । अत्र दशाप्रकरणे संक्षेपः सूत्रव्याख्यायां ज्योतिषकल्पलतायाम् अस्मत्पुत्रेण सोमनाथमिश्रेण प्रकाशीकृतम् । तदपि दृष्ट्वा दशानिर्णयः कर्तव्यः ।

अध्यायाः द्वात्रिंशद् ग्रन्थमितिः संख्यया द्विसाहस्रम् ।
तत्र ज्योतिषसंख्या चतुरधिकशतं च दशसहस्रमपि ॥
भो भो ज्योतिषकाःकिमत्र कथनैः शास्त्रान्तरैः केवलैः
प्राप्तव्यं यदि वः फलं नवसुधाकल्पं प्रभूणां ततः ।
कृष्णीयां मधुराकृतिं मधुभिदः प्रीत्यै महातूलिकां
कण्ठे क्षोणिपतेः सदा विदधतां धत्तां मुदं सन्ततम् ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्तविद्यावैदुष्य श्रीकृष्णमिश्रकृतौ फलरत्नमालायां ग्रन्थागमयुगादिलक्षणं नामाष्टाविंशोऽध्यायः ॥

श्रीः श्रीः श्रीः

---

1. ङ. रामकटाक्ष क. स्वामि. ग. शिव. 2. च. नयेदायुषम् ।